भं च ब्रह्म देवा अवीवृधन्निति प्राचीं जुहूं प्रहरत्यथा सपत्नानिन्द्राग्नी मे विषूचीनान्व्यस्यतामिति प्रतीचीमुपभृतं प्रत्यूहति प्राच्याः परिधीननक्ति वसु
भ्यस्त्वेति मध्यमं रुद्रेभ्यस्त्वेति दक्षिणमादित्येभ्यस्त्वेत्युत्तरमथोपभृतमद्भिः संस्पृश्य यथायतनं स्रुचौ सादयित्वा स्रुक्षु प्रस्तरमनक्त्यक्तं रिहा
णा इति जुह्वामग्राणि वियन्तु वय इत्युपभृति मध्यानि प्रजां योनिं मा निर्मृक्षमिति ध्रुवायां मूलान्यथ प्रस्तरात्तृणं प्रच्छिद्य जुह्वामवदधात्यथाश्राव
यत्याश्रावयास्तु श्रौषडिषितो दैव्या होतारो भद्रवाच्याय प्रेषितो मानुषः सूक्तवाकाय सूक्ता ब्रूहीति तमुपरीव प्राञ्चं प्रहरति नात्यग्रं प्रहरति न पुरस्ता
त्प्रत्यस्यति न प्रतिशृणाति न विष्वञ्चं वियौत्यूर्ध्वमुद्यौत्याप्यायन्तामाप ओषधयो मरुतां पृषतयः स्थ दिवं गच्छ ततो नो वृष्टिमेरयेत्यथाग्नीध्रमीक्षतेऽग्नीदि
ति तमाहाग्नीध्रः संवदस्वेत्यगानग्नीदित्याहाध्वर्युरगन्नित्याहाग्नीध्रः श्रावयेत्याहाध्वर्युः श्रौषडित्याहाग्नीध्र इदं ब्रूहीत्याहाध्वर्युरनुप्रहरेत्याहाग्नी
ध्रोऽनुप्रहरति स्वगा दैव्या होतृभ्यः स्वस्तिर्मानुषेभ्यः शंयोर्ब्रूहीत्यथोपाश्रायाहवनीयमुपतिष्ठत आयुष्पा अग्नेस्यायुर्मे पाहि चक्षुष्पा अग्नेसि चक्षुर्मे
पाहीत्यथैमामभिमन्त्रयते ध्रुवासीति मध्यमं परिधिमनुप्रहरति यं परिधिं पर्यधत्था अग्ने देव पणिभिर्वीयमाणः ॥ तेन एतमनु जोषं भरामि नेदेष त्वदपचेत

Indira Gandhi National
Centre for the Arts

बौ० क० सू० यातादित्यथेतरावुपसमस्यति यज्ञस्य पाथउपसमितमित्यथैनान्तः स्रावेणाभिजुहोति जुह्वामुपभृतः संयस्रावयति सः स्रावभागा स्थेषा बृहन्तः
१० प्रस्तरेष्ठा बर्हिषदश्च देवा इमां वाचमभि विश्वे गृणंत आसद्यास्मिन्बर्हिषि मादयध्वं स्वाहेत्यथ प्रदक्षिणमावृत्य प्रत्यङ्ङुदुत्य धुरि स्कंधौ विमुञ्चत्य
ग्ने वाममन्नं गृहस्य सदसि सादयामि सुम्नाय सुम्निनी सुम्ने मा धत्तं धुरि धुर्यौ पातमिति यद्युवैनानो भवत्युत्करएवैनं स्कंध्यं विमुंचत्येतेनैव मंत्रेण॥
॥१९॥ अथादत्ते दक्षिणेनाज्यस्थालीं स्रुक्सवाः स्रुव्येन जुहूः होत्रे वेदं प्रदायप्रदक्षिणमावृत्य प्रत्यंचावादन्तो दक्षिणेनाध्वर्युर्गार्हपत्यं परिक्रामत्यु
त्तरेण होता तौ जघनेन गार्हपत्यं पश्चात्प्रांचावुपविशतो दक्षिणएवाध्वर्युरुत्तरतो होताथाध्वर्युर्वेदमुपभृतं कृत्वाथ चतुर आज्यस्य गृण्हान आह सोमा
यत्युपांश्वनुब्रूहीत्युच्चैराश्राव्याह सोममित्युपांशु यजेत्युच्चैर्वषट्कृते जुहोत्यथ चतुर आज्यस्य गृण्हान आह त्वष्ट्र इत्युपांश्वनुब्रूहीत्युच्चैराश्राव्याह
त्वष्टारमित्युपांशु यजेत्युच्चैर्वषट्कृते जुहोत्यथ चतुर आज्यस्य गृण्हान आह देवानां पत्नीभ्य इत्युपांश्वनुब्रूहीत्युच्चैराश्राव्याह देवानां पत्नीरित्युपां
शु यजेत्युच्चैर्वषट्कृते परिश्रितं देवानां पत्नीर्यजत्यथ चतुर एवाज्यस्य गृण्हान आहाग्नये गृहपतय इत्युपांश्वनुब्रूहीत्युच्चैराश्राव्याहाग्निं गृहपतिमित्यु
पांशु यजेत्युच्चैर्वषट्कृते उत्तरार्धपूर्वार्धे तिहाय पूर्वा आहुतीर्जुहोत्यथाग्रेण होतारमुपावर्त्य होतुर्द्विरंगुलोवनेनि जिघ्रेण भक्षयित्वा चतुर्हस्तेडां संपादय १०
त्याज्यस्यैव समन्वारभते ध्वर्युश्चैव पत्नी चोपहूतायामिडायामामर्शन्धा आद धातिषडवत्तं प्राश्नीतो मार्जयेतेथ स्रुचि चतुर्गृहीतं गृहीत्वापसलैः पर्यावृत्या
न्वाहार्यपचने प्रायश्चित्तं जुहोत्युलूखले मुसले यच्च शूर्प आशिश्लेष दृषदि यत्कपाले॥ अवप्रुषो विप्रुषः संयजामि विश्वेदेवा हविरिदं जुषन्तां यज्ञेया

विप्रुषः संतिबर्हिष्यग्नेस्ताः सर्वाः स्विष्टाः सुहुता जुहोमि स्वाहेत्यपरं चतुर्गृहीतं गृहीत्वा न्वाहार्यपचन एवेध्मप्रव्रश्चनान्यभ्याधाय फलीकरणानीप्यफली
करणहोमं जुहोत्यग्नेरध्याये ज्ञानतनो पाहिमा द्य दिवः पाहि प्रसित्यै पाहि दुरिष्ट्यै पाहि दुरद्मन्यै पाहि दुश्चरितादविषं नः पितुं कृणु सुषदा योनिः स्वाहेत्यथैतेनै
वयथेतमेत्य होत्रे वेदं प्रदाय पत्न्यै विष्यति इमं विष्यामि वरुणस्य पाशं यमबध्नीत सविता सुकेतः॥ धातुश्च योनौ सुकृतस्य लोके स्योनं मे सह पत्या करोमी
त्यथास्यै योक्त्रमंजलावाधायोदपात्रमानयति समायुषा सं प्रजया समग्ने वर्चसा पुनः॥ संपत्नी पत्याहं गच्छे समात्मा तनुवा ममेत्यथ मुखं विमृष्टे यदस्यु
ते सरस्वति गोष्वश्वेषु यन्मधु। तेन मे वाजिनीवति मुखमङ्धि सरस्वतीत्यपो निनयत्यवभृथस्यैवरूपं कृत्वोत्तिष्ठतीति ब्राह्मणं॥२०॥ अथैनां तथैव तिरःप
वित्रमप आनामयति पयस्वतीरो० सजेत्यथैनां गार्हपत्ये समिध आधापयत्यग्ने व्रतपते व्रतमचारिषं तदशकं तन्मेराधि स्वाहेत्यथ यथाप्रपन्नं निष्क्राम
त्यथ प्राङेत्य ध्रुवामाप्याययत्याप्यायतां ध्रुवा घृतेन यज्ञं यज्ञं प्रति देवयद्भ्यः॥ सूर्याया ऊधोदित्या उपस्थ उरुधारा पृथिवी यज्ञे अस्मिन्नित्यथाज्यस्थाल्याः
स्रुवेणोपघातं प्रायश्चित्तं जुहोत्याश्रावितमत्याश्रावितं वषट्कृतमत्यनूक्तं च यज्ञे॥ अतिरिक्तं कर्मणो यच्च हीनं यज्ञः पर्वाणि प्रतिरन्नेति कल्पयन्स्वाहा
हुतादोऽहुतं देवान्स्वाहेत्यथ यज्ञस्य समृद्धीर्जुहोतीष्टेभ्यः स्वाहा वषडनिष्टेभ्यः स्वाहा भेषजं दुरिष्ट्यै स्वाहा निष्कृत्यै स्वाहा दौराध्यै स्वाहा दैवीभ्यस्तनूभ्यः
स्वाहा ऋध्यै स्वाहा समृध्यै स्वाहा सर्वसमृध्यै स्वाहा भूः स्वाहा भुवः स्वाहा सुवः स्वाहा भूर्भुवः सुवः स्वाहेमं मे वरुण तत्त्वायामि त्वं नो अग्ने स त्वं नो अग्ने त्वम
ग्ने अयास्य यासन्मनसा हितः॥ अयासन्हव्यमूहिषे या नो धेहि भेषजं स्वाहा॥ अयाश्चाग्नेरस्यनभिशस्तीश्च सत्यमित्त्वमया असि॥ अयसा मनसा

Indira Gandhi National
Centre for the Arts

धृतोयमाहव्यम् दिवियानोधेह्निभेषजं स्वाहा॥ यदस्मिन्कर्मण्यंतरगामंत्रः कर्मस्तोवा॥ अनयाहुत्यातच्छमयामिसर्वंतृप्यंतुदेवा अव
संतांघृतेनस्वाहा॥ यदस्यकर्मणोत्यरीरिचंयद्वान्यूनमिहाकरं॥ अग्निष्टत्स्विष्टकृद्विद्वान्सर्वं स्विष्टं सुहुतंकरोतुमे॥ अग्नयेस्विष्टकृतेसुहुत
हुतआहुतीनांकामानां समर्धयित्रेस्वाहा॥ प्रजापतेनत्वदेतान्यन्योविश्वाजातानिपरिताबभूव॥ यत्कामास्तेजुहुमस्तन्नोअस्तुवयं स्यामपतयो
रयीणां स्वाहेत्यथबर्हिषोधातूनां संप्रलुप्यध्रुवायां समनक्तिसमंक्तांबर्हिर्हविषाघृतेनसमादित्यैर्वसुभिः संमरुद्भिः॥ समिंद्रेणविश्वेभिर्देवेभि
रंक्तां॥ मित्यग्रेणाहवनीयेनुप्रहरतिदिव्यंनभोगच्छतुयत्स्वाहेत्यथोपोत्थायदक्षिणेनपदावेदिमवक्रम्यध्रुवयासमिष्टयजूंषिजुहोति देवागातुविदोगातुंवित्वा
गातुमितमनसस्पतइमंनोदेवदेवेषुयज्ञं स्वाहावाचिस्वाहावातेधाः स्वाहेत्युदृहतिस्रुवंनिनयतिप्रणीताउपोत्थाययजमानोदक्षिणेनपदाविष्णुक्रमान्
क्रमतेसंतिष्ठतआमावास्यंवापौर्णमासंवाहविर्हविः॥ २१॥ ॥इतिबौधायनकल्पसूत्रेप्रथमः प्रश्नः॥ १॥ ॥अथांपव्याहरणंविज्ञायतेकृत्वा
दीक्षतुकामंकामयीतयज्ञांगादीयज्ञांगकाममितिप्राक्कूलान्दर्भान्स्तंस्तीर्यतेषुप्राङ्मुखोयजमानउपविश्यजपतियाः पुरस्तात्प्रस्रवन्त्युपरिष्टा
त्सर्वतश्चयाः॥ ताभीरश्मिपवित्राभिः श्रद्धांयज्ञमारभे॥ देवागातुविदोगातुंयज्ञायविंदत॥ मनसस्पतिनादेवेनवाताद्यज्ञः प्रयुज्यतामितिश्रद्धामाह्वयति
श्रद्धएहिसत्येनत्वाह्वयामीत्याकूत्यावेदनंकरोत्याकूत्यैत्वाकामायत्वासमृधेत्वा॥ पुरोदधेअमृतत्वायजीवसे॥ आकूतिमस्यावसेकाममस्यसमृध्यै
इंद्रस्ययुंजतेधियः॥ आकूतिंदेवींमनसः पुरोदधेयज्ञस्यमातासुहवामेअस्तु॥ यदिच्छामिमनसासकामोविदेयमेनद्धृदयेनिविष्टमितिमनसात्रिः सं

कल्पयतेत्रिरुच्चैः सर्वकामोग्नीनाधास्यइत्यग्न्याधेयेस्वर्गकामोदर्शपूर्णमासाभ्यांयक्ष्यइतिदर्शपूर्णमासयोः स्वर्गकामश्चातुर्मास्यैर्यक्ष्यइतिचातुर्मा
स्येषुस्वर्गकामः पशुनायक्ष्यइतिपशुबंधेस्वर्गकामः सोमेनयक्ष्यइतिसोमेस्वर्गकामोग्निंचेष्यइत्यग्निचयनेहीनैर्हर्गणैर्वायथाकामोयत्कामोवायजते
तन्मेकल्प्यतांतन्मेसमृध्यतांतन्मेसंपद्यतांकामइत्यथर्त्विजांप्रतिवचनंतत्तेकल्प्यतांतत्तेसमृध्यतांतत्तेसंपद्यतांकामइत्योंतथेतिप्रतिवचनं॥ १॥ अथ
र्त्विजोदेवयजनंयाचतेध्वर्योदेवयजनंमेदेहीत्यध्वर्युमादित्योदेवोदेवोध्वर्युः सतेदेवयजनंददात्वित्योंतथेतिप्रतिवचनंब्रह्मन्देवयजनंमेदेहीतिब्रह्माणं
चंद्रमादेवोदेवोब्रह्मासतेदेवयजनंददात्वित्योंतथेतिप्रतिवचनंहोतर्देवयजनंमेदेहीतिहोतारमग्निर्देवोदेवोहोतासतेदेवयजनंददात्वित्योंतथेतिप्रतिव
चनमुद्गातर्देवयजनंमेदेहीत्युद्गातारंपर्जन्योदेवोदेवउद्गातासतेदेवयजनंददात्वित्योंतथेतिप्रतिवचनंसदस्यदेवयजनंमेदेहीतिसदस्यमाकाशोदेवोदेवःस
दस्यः सतेदेवयजनंददात्वित्योंतथेतिप्रतिवचनंहोत्रकादेवयजनंमेदत्तेतिहोत्रकानापोदेव्योदेव्याहोत्राशंसिन्यस्तास्तेदेवयजनंददात्वित्योंतथेतिप्रति
वचनंचमसाध्वर्यवोदेवयजनंमेदत्तेतिचमसाध्वर्यून्रश्मयोदेवादेव्याश्चमसाध्वर्यवस्तेतेदेवयजनंददत्वित्योंतथेतिप्रतिवचनमपिवान्देवयजनंया
चतआदितएवतार्थेस्नात्वादेत्याहतंवासः परिधायशुध्दोहेवशुचिः पूतोमेध्योविपाप्माब्रह्मचारीसहकारिप्रत्ययआचतुर्थात्कर्मणोभिसमासमाणोवेद
कर्माणिप्रयोजयेत्प्रागपवर्गाण्युदगपवर्गाणिवाप्राङ्मुखः प्रदक्षिणंयज्ञोपवीतीदैवानिकर्माणिकरोतिदक्षिणामुखःप्रसव्यंप्राचीनावीतीपित्र्याणि
तिष्ठन्नासीनः प्रह्वोवायथान्यायंछंदोगब्राह्मणंयथावेदक्षिणः पाणिरेवंदेवयजनंयथासव्यस्तथापितृयजनंयथापितृयजनंतथाश्मशानकरणंयथाश्मशा

Indira Gandhi National
Centre for the Arts

बौ॰ श्र॰ सू॰ नकरणं तथा भिन्नवर्णा। यथिष्टिपशुर्मो मेधादित्यवपुरोदकं देवयजनं यस्मादन्यत्पुरस्तात्समंतिकं देवयजनं नविंदेयुरुत्तरतो देवयजनमात्रमतिशिनष्टि
१२ ॥ २॥ अथर्त्विजां वरणं विज्ञायते ब्राह्मणा ऋत्विजो यो निर्गोत्रश्रुतवृत्तसंपन्ना अविगुणांगा अनवकीर्णिनो अत्र वि, गिनोनपरिरवाति क्रांतानांनी
सं चगानां त्यैजानाः ननूचानाहालेयवालेयपुत्रिकापुत्रपरसेत्रसहोटकानीनानुजावरद्विप्रवरान्नत्रिहाप्यांगिरसोध्वर्युर्वासिष्ठो ब्रह्मा वैश्वामि
त्रो होता यास्य उद्गाता कौषीतकः सदस्यो वसिष्ठा भृगवां गिरसो वा यो निर्वृत्तं विद्यात्प्रमाणमित्येकेतांश्चैवृणीताप्यापन्नांगानेव वृणीतांः कुन
खिन मध्वर्युमकिलासिनं ब्रह्माणमखंडं होतारमकराळमुद्गातारमशिपिविष्टं सदस्यं प्रतिप्रस्थातानेष्टोन्नेतध्वर्युपुरुषा ब्राह्मणाच्छंस्याग्नीध्रः
पोततिब्रह्मणो मैत्रावरुणोच्छावाकोग्रावस्तुदिति होतुः प्रस्तोता प्रतिहर्ता सुब्रह्मण्य इत्युद्गातुरभिगरोध्रुवगोपः सं स्त्रावइति सदस्यस्यस्वप्रधानाअस्व श्री
न्यै प्रधाना इत्येके दशायैकादशावा चमसाध्वर्यवो नैतंदक्षिणाभिः परिक्रीताभवंतीति विज्ञायते तस्मादग्निहोत्रस्य यज्ञकर्तारे कऋत्विक दर्शपूर्णमासयोश्चत्वा
र ऋत्विजोध्वर्युब्रह्माहोताग्नीध्र इति चातुर्मास्येषु प्रतिप्रस्थाता पंचमः पशुबंधे मैत्रावरुणः षष्ठः सर्वे सौम्ये ध्वरे तान्कर्मणः कर्मणो वृणीते केकमुपसंगृह्य
चोदयेदसाबहमाध्वर्यवेण लागच्छामि याजय त्वमाभवानिति ब्रह्मत्वे नहौत्रेणौद्गात्रेण सादस्येनेति न सदस्यो विद्यत इत्येके स्वेन कर्मणा होत्रकानु न होत्रकानि
त्येके तत्पुरुषा होत्रकाश्चमसाध्वर्यवश्चाध्वर्युर्वा ऋत्विजां प्रथमो युज्यते तेन स्तोमो योक्तव्य इति॥ ३॥ आदित्यो देवो दैव्योध्वर्युः स मेध्वर्युरध्वर्यो ध्वर्युं त्वा १२
वृण इत्यध्वर्युमादित्यो देवो दैव्योध्वर्युः स ते ध्वर्युस्तेनानुमतः कर्मैधाहं करिष्यामीत्योंतथेति प्रतिवचनं चंद्रमा देवो दैवो ब्रह्मा स मे ब्रह्मा ब्रह्मन्ब्रह्माणं त्वा वृण

इति ब्राह्मणं चंद्रमा देवो दैवो ब्रह्मा स ते ब्रह्मा तेनानुमतः कर्मैवाहं करिष्यामीत्योंतथेति प्रतिवचनमग्निर्देवो दैवो होता स मे होता होतर्होतारं त्वा वृण इति
होतारमग्निर्देवो दैवो होता स ते होता तेनानुमतः कर्मैवाहं करिष्यामीत्योंतथेति प्रतिवचनं पर्जन्यो देवो दैव उद्गाता स म उद्गातोद्गातरुद्गातारं त्वा वृण इ
त्युद्गातारं पर्जन्यो देवो दैव उद्गाता स त उद्गाता तेनानुमतः कर्मैवाहं करिष्यामीत्योंतथेति प्रतिवचनमाकाशो देवो दैवः सदस्यः स मे सदस्यः सदस्यस
दस्यं त्वा वृण इति सदस्यमाकाशो देवो दैवः सदस्यः स ते सदस्यस्तेनानुमतः कर्मैवाहं करिष्यामीत्योंतथेति प्रतिवचनमापो देव्यो दैव्या होत्राशंसिन्य
स्ता मे होत्राशंसिन्यो होत्राशंसिन्यो होत्रकान्वो वृण इति होत्रकानापो देव्यो दैव्या होत्राशंसिन्यस्ता स्ते होत्राशंसिन्यस्ताभिरनुमताः कर्मैव वयं क
रिष्याम इत्योंतथेति प्रतिवचनं रश्मयो देव्यो दैव्याश्चमसाध्वर्यवस्ते मे चमसाध्वर्यवश्चमसाध्वर्यवश्चमसाध्वर्यून्वो वृण। इति चमसाध्वर्यून् रश्मयो देवा
दैव्याश्चमसाध्वर्यवस्ते ते चमसाध्वर्यवस्तैरनुमताः कर्मैव वयं करिष्याम इत्योंतथेति प्रतिवचनं हुतो हुतो जपति महन्मे वोचो यशो मे वोचो भगो मे वोचो भर्गो
मे वोचस्तपो मे वोचस्तेजो मे वोचः कीर्तिं मे वोचो भुक्तिं मे वोचो विश्वं मे वोचः सर्वं मे वोचः सर्वकल्याणं मे वोचस्तन्मामवतु तन्माविशतु तन्मा जिन्वतु तेन भुक्षिषी
य इत्यथादद्वामतिसोमः सोमं मेत्योंतथेति प्रतिवचनं॥ ४॥ सिंहे मे मन्युर्व्याघ्रे मंतरामयो वृके मे क्षुच्छ्वमघ सिर्धन्व निमिषिपासा राजगृहे मे शनयाः श्मनिर्मितं
द्रिर्गर्दभे मे शिराः शल्यके मे द्रौ रश्वत्थे मे वेपथुः कूर्मे मंगरो गोबस्ते मे ऽपसर्या प्रियं मे मृत्युर्भ्रातृव्ये मे पाप्मा सपत्ने मे निरृतिर्दुष्कीर्तिर्मे गृध्रि परस्वतिमे समृद्धिः
खद्गे मे भार्त्तिर्गवये मे आंध्यं गोरे मे बाधिर्यमृक्षे मे शोकोगाधायां मे स्वदो जरायां मे हिमः कृष्णशकुनेमेभीरुता कशे मे पापगंधस्तृके मे स्वप्नशः क्रोके मेर्ष्या

बौ॰ क॰ सू॰ मर्कटे मे दुर्बुधिः कुलले मे मस्योलले मे प्रध्योष्टे मे तृष्णर्ये मे श्रमो व्यम आव्यं कोशे मे गंधः कुमार्यमिलंकारः सूकरे मे क्रुद्धः स्वदास्वुनि मे स्वप्नोजागरे मे दुःस्व
३२ प्नो विद्युति मे स्मयशो लोभायां मे क्रोदः शरभे मे पापालक्ष्मीः स्त्रीषु मे नृतमजासु मे कर्कशो वात्यमईस्याश्रृंद्रे मे स्तेयं वैश्ये मे कार्मकृत्यं राजन्यबंधुनि मे ज्ञानं नैषा
दे मे ब्रह्महत्या कलिंगे मे स्तवथुरुलले मे विलामत उद्रिणि मे वमनिः किंपुरुषे मे रोदो दूीपिनि मे निष्टपधस्ति नि मे किलासः शुनि मे दुरिप्रस्नावन्येषु मे म्लें छोविदें हेषु मे
शो पयो महावर्षेषु मे ग्लोमूजवत्सु मे तप्ता दुंदुभौ मे काशिके स्वाकुषु मे पित्तं कलिंगेषु मे मध्यमश्वतर्यामिः प्रजस्तापुं श्चल्यां मे दुश्चरित्रमास्वुनि मे दंतरोगो
मक्षिकायां मे श्वल्करा शुके मे हरिमा मयूरे मे जल्प्यादृषे मे जराचाषे मे पापवादो सु मे भ्रमो ब्रह्मास्त्रे मे किल्बिषमंपहि पाप्मन्युनरपनाशिनो भवानः पाप्मं
सुहृतस्य लोके पाप्मंधेत्यविहृते यानः पाप्मेन जहाति तमुत्वा जहिमो वयमन्यत्रास्मन्निविशतां स्सह स्रासो अमर्त्यो योनो द्वेष्टि स रिष्यतु यमु द्विष्मस्तमु जही
त्यथांजलिनापउपहंति सुमित्रान आप ओषधयः संतितितां दिशं निरुस्सति यस्यामस्य दिशि द्वेष्यो भवति दुर्मित्रास्तस्मै भूयासुर्यो स्मान्द्वेष्टि यं च वयं द्विष्म इत्यथा
पउपस्पृश्य यथेतं प्रविशंति ॥ ५ ॥ अथेदमग्न्याधेयं तस्य कः कर्मण उपक्रमो भवतीत्युक्तान्यृतुनक्षत्राण्युक्तमात्मनः पुरश्चरणं कथमत्रानुपूर्व्यं भवति स्नानपव
नमंत्राचमनमंत्रप्रोक्षणपुण्याहवाचना निश्रद्धामाद्स्याकूत्यावेदनं कृत्वोपव्यात्दत्य कृत्तिज्ञो हत्वाहेयित्वा देवयजनं याचित्वा देवयजनमादायस्यमादायांतरेण वे
द्युत्करावुद्देशान प्रपद्यज घनेन गार्हपत्यं तिष्ठन्प्राचीं स्स्थन गार्हपत्यस्यायतनमुद्दंस्तुद्दंन्यमानमस्या अमेध्यमपपाप्मानं यजमानस्य हंतु ॥ शिवा नः संतु प्रदि ३२
शश्चतस्रः शंनो माता पृथिवी तोकसातेत्यथैनमद्भिरवोक्षति शंनो देवीरभिष्टय आपो भवंतु पीतये ॥ शंयोरभिस्रवंतुन इत्येवमेवान्वाहार्यपचनस्यायतनमुद्धत्येव

माहवनीयस्यैवमितरयोर्यदि करिष्यन भवत्यथांतरेण वेद्युत्करावुद्देशेनोदङुपनिष्क्रम्यतां दिशं यंति यत्रास्य संभारा उपक्लृप्ता भवंत्यपि वोत्तरे
णशालायाः सर्वे संभारा उपक्लृप्ता भवंत्यपि वांतर्वेदि प्राचीनं तान्मंत्रानुपूर्व्यमेकैकं संभारमेकैकेन यजुषा संभरति ॥ वैश्वानरस्य रूपं पृथिव्यां परि
स्रसास्थान माविशंतु न इति सिकताः संभृत्य निदधात्येवमेवोत्तरमुत्तरं संभारमुत्तरेणोत्तरेण यजुषा संभृत्य संभृत्यैव निदधात्यूषाश्च सिकताश्चा
खूत्करं च वल्मीकवपां च सूदं च वराहविहतं च पुष्करपर्णं च शर्कराश्चेत्यथैष्टो पार्थिवानथोत्तरेण यजुषा षड्ढिरण्यशल्कानामाहरत्यथवानस्पत्याभिर्वान
स्पत्याः शाखा आर्द्राः सपलाशाः सप्ररोहाः प्रादेशमात्रीअप्रतिशुष्काग्रा आहरत्यपि वा यथालाभं पर्णद्वाभ्यां चित्रियस्याश्वत्थस्य तिस्रः समिध आ
र्द्राः सपलाशाः सप्ररोहाः प्रादेशमात्रीरप्रतिशुष्काग्रा आहरत्यपि वा यथालाभं चित्रियादश्वत्थात्संभृता हहत्य शरीरमभिसंस्कृतास्त प्रजापतिनाय
ज्ञमुखेन संमितास्तिस्रस्त्रिवृद्भिर्मिथुनाः प्रजात्या इत्यथ मुंजकुलायमाहरति यांते अग्न ओजस्विनी तनूरोषधीषु प्रविष्टा तांत इह संभरामीत्यथास्मा अर
णी आहरत्याश्वत्थीं शामीगर्भां मप्यशामीगर्भां या चतुरंगुलोत्सेधा द्वादशांगुलविस्तीर्णा षोडशांगुलमायतामपि वा प्रादेशमात्रीं सर्वतः समां चतुरं
गुलमेवोत्सेधां तस्या उत्तानाया अनुलोमम धस्तात्प्रतीचीनप्रणवं प्रजननं कुर्वंति तावतीमेवोत्तरारणि मथैने आहरत्यश्वत्थाद्धव्यवाहाद्धिजातामग्ने
ग्नेस्तनूं यज्ञियां संभरामि ॥ शांनयो निं शमीगर्भमग्नये प्रजनयितवे ॥ यो अश्वत्थः शमीगर्भ आरुरोह त्वे सचा ॥ तंते हरामि ब्रह्मणा यज्ञियैः केतु
भिः सहेत्यथैतान्स्संभृतान्त्संभारान्पुनरेव संभरति यं त्वा समभरं जातवेदो यथा शरीरं भूतेषु न्यक्तं ॥ स संभृतः सीद शिवः प्रजाभ्य उरुं नो लोकमनु नेषि

Indira Gandhi National
Centre for the Arts

बौ० क० विद्वानिति॥ ६ ॥अथर्वैभवतीद्रोहत्र ं हत्वा॥सुरान्पराभाव्य॥सोमावास्यांप्रत्यागछत्॥तेपितरःपूर्वेद्युरागछन्॥पितॄन्यज्ञोगछन्॥तंदेवाःपुनरया
१४ चंत॥तमेभ्योनपुनरददु॥स्तेब्रुवन्वरंवृणामहै॥अथवःपुनर्दास्यामः॥अस्मभ्यमेवपूर्वेद्युःक्रियाताइति॥तमेभ्यःपुनरददु॥स्तस्मात्पितृभ्यःपूर्वेद्युःक्रि
यतं॥यत्पितृभ्यःपूर्वेद्युःकरोति॥पितृभ्यएवतद्यज्ञंनिष्क्रीययजमानःप्रतनुइतिब्राह्मणमथयदिगांनलभतेपिवाघृतमोदनंपक्वातस्योपरिष्टात्प्रभू
तमाज्यंपर्याघानीयतस्मादेतत्सर्वंकरोतियतगवाकार्यविज्ञायतेधेन्वेवाएतद्रेतोयदाज्यंपयोवानडुहस्तंदुलाइतिगोरेवांगसामान्यात्संप्रयछन्नाअं
बरीषंवोत्तपनीयंवाभिप्रव्रजंत्यपिवौपासनमेवाभिप्रव्रजंत्यर्धमौपासनंकुर्वतिसर्ववाब्राह्मौदनिकंकुर्वतिसोत्रचैवहिहूयतइतिसमानंकर्मासंभार
निवपनादथतृतीयंसंभाराणांत्रेधाविभज्यसभ्यावसथ्ययोराहवनीयेवासभ्यावसथ्ययोःसंकल्पःसमानंकर्मासमिदाधानात्संचपंचनानावृक्षायाः
समिधोभ्यज्यादधातिकथमत्रानुपूर्व्यंभवत्यश्वत्थश्चौदुंबरश्चपर्णश्चशमीचविकंकतश्चेत्येतदत्रानुपूर्व्यंभवतिकथमुखल्वेंद्राग्नादित्ययोरंतइत्येंद्रा
ग्नादित्ययोरंतउदाश्वपदिकंसृजेत्ततोन्यंदद्याहोत्रर्थमुद्धरेदितितंत्रंसमासएवैतदुपपद्यतेनान्यत्रप्रणीतस्याग्नेर्लौकिकत्वाद्यस्मिन्होत्राद्भुतंस्यात्सो
ग्निःकर्मार्तंतस्यधारणमित्यपवृत्तेकर्मणिलौकिकःसंपद्यतेप्रसिद्धानिनतुहवींषिप्रसिद्धाअग्न्याधेयदक्षिणादद्यातिताश्चेन्नाधिगछेद्वासांस्य
तावंतिमंथान्वौदनान्वैतावतोदद्यात्तेनोहैवैतंकाममवाप्नोत्यप्येकांगांदक्षिणांदद्यादितिपैंग्लायनिब्राह्मणंभवतिनत्वेवानाहिताग्निःस्याद्विज्ञाय १४
तेचदेवानांवाएषोन्यतमोयआहिताग्निरित्यथयदस्याग्निमुद्धरंतिसहस्रंतेनकामदुघोवरुंधेथयद्यग्निहोत्रंजुहोतिसहस्रंतेनेत्यपरिमितमेवेदमुक्तं

भवति॥ ७ ॥अथाग्न्याधेयस्यौपवसथ्इत्युपकल्पयतेगामाःसलामहतंवासश्चतुरउदकुंभांस्त्रीनौदुंबरांश्छूलानौदुंबरींदर्वींमेकांवपाश्रपणीम
विशाखामौदुंबरीमेवसर्वानेवान्यांःस्थालीपाकान्पैतृयज्ञिकान्संभारानेरकोपबर्हणेआंजनाभ्यंजनेआज्यंतृणमुष्टिंस्फ्यंसूत्रमितिदक्षिणतए
तत्परिश्रितंभवतितस्येतस्मिन्परिश्रितेप्राग्वृत्तस्यकेशांतंकरोतितूष्णींत्रीणिदर्भपुंजीलान्युपनिवपतिवपेत्यववपेद्देवेनसवित्राप्रसूतोब्रह्मणा
संशितोहंयजमानोवप्तदेवामित्रैमेयतेयानिमइतऊर्ध्वेलोमानितानिमेस्वस्तयेसंत्वित्यथैनमुष्टकेशश्मश्रुनिकृत्तनखमुदकुंभेनाभ्यवनयन्
वाचतीमामआपःशिवाःसंतुदुष्कृतंप्रवहंतुमे॥शुद्धाःप्रयुंजीमहिक्रतूनितिसुस्नातःप्राङुपसृप्याहतंवासःपरिधायालंकृत्याक्तेःथैनमेकविंशत्या
दर्भपिंजूलैस्त्रिधाविभक्तैःसप्तभिःसप्तभिस्तूष्णींपवयित्वोदपात्रमादायेमांदिशंनीत्वाचतुष्पथएतस्मिन्नेवोदपात्रेवेक्षमाणंपाप्मनोविनिधीन्वा
चयतिसिंहेमेमन्युर्व्याघ्रेमेंतरामयइत्यांतमेतमनुवाकंनिनीयापःपरास्यपात्रमनवेक्षमाणाआयंतिहस्तपादान्प्रक्षाल्यैतेनैवयथेतमेत्यपवमा
नःस्ववर्जनइत्येतमनुवाकंयजमानंवाचयन्नद्भिर्मार्जयतिआमात्यादिध्ममादीप्यान्वाहार्यपचनवेलायांसादयित्वाशोधयित्वाबर्हिषापरिस्तीर्याज्यं
विलाप्योत्पूयोत्तरतएतानुपसादयतिचतुरउदकुंभांस्त्रीनौदुंबरांश्छूलानौदुंबरींदर्वींमेकांवपाश्रपणीमविशाखामौदुंबरीमेवदक्षिणतःसर्वानेवान्यां
स्थालीपाकान्पैतृयज्ञिकान्संभारानेरकोपबर्हणेआंजनाभ्यंजनेआज्यंतृणमुष्टिंस्फ्यंसूत्रमितिदक्षिणतोधिदेवनंकरोतितदेकोनपंचाशतोक्षां
निवपत्यथस्फ्यमादायसहदेवदक्षिणाध्वंत्यपहताअसुरारक्षांसिपिशाचायेक्षयंतिपृथिवीमनु॥अन्यत्रेतोगछंतुयत्रैतेषांगतंमनइत्यथैनद्धि

Indira Gandhi National
Centre for the Arts

बौ० क० रेवोऽस्त्युदीरतामवरउत्परासउन्मध्यमाः पितरः सोम्यासः॥असुंयईयुरवृकाऋतज्ञास्तेनोहवंतुपितरोहवेष्वित्यथोल्मुकमादत्ते॥ ८ ॥यआददानाःस्व
१५ धयानवानिपित्र्याणिरूपाण्यसुराश्चरंति॥पुरापुरोनिपुरोयेभरंत्यग्निष्टानस्मात्प्रणुनोक्तुयज्ञादितितेनोध्वतमभितपत्यग्निःपावकःसुदिनानिकृण्वन्नि
तोसुरान्नुदतादूरमोकसः॥पितृणांयेचवर्णंकृत्वेहभागमिच्छंतइतितदत्रैवव्यंतंकरोतितस्मिन्नुल्मुकआज्यस्तोकंप्रश्चोतयदिदक्षिणाग्रंबर्हिस्तृणातिसकृ
दाछिन्नंबर्हिरूर्णामृदुस्योनंपितृभ्यस्त्वास्तृणाम्यहं॥अस्मिन्त्सीदंतुमेपितरःसोम्याःपितामहाःप्रपितामहाश्चानुगैःसहेत्यथपितृनावाहयत्युदीराणाद
हसंतुनःसोम्याःपितरःपितामहाःप्रपितामहाश्चानुगैःसह॥असुंगमाःसत्ययुजोवृकासआनोहवंपितरोयागमंतु॥एहगच्छंतुपितरोहविषेअत्तवे॥अस्मिन्
यज्ञेबर्हिष्यानिषद्यमावीरप्रमायुनगित्यथैभ्यएरकोपबर्हणेनिवदयतआसनःस्रायनंचेमेतयोःसोम्यासआगताः॥प्रियाजनायनोभूत्वाशिवाभवथत्रोक
राइत्यथैभ्यःपानान्याहरतिमधुपानंक्षीरपानंसक्तुपानंयद्वाभवत्यन्यतब्राह्मणेभ्योददात्यन्यदुपनिनयतएतद्वःपितरःपितामहाःप्रपितामहाःपानमित्यत्रैके
नोदकुंभेनमार्जयतितूष्णींतदक्षान्पर्युपविशंति॥ ९॥चत्वारःपितापुत्राःपितापुरस्ताज्ज्येष्ठोदक्षिणतोनुजःपश्चात्कनीयानुत्तरतोद्वादशासापिताप्रछिनत्ति
तद्विजयंतद्वादशाज्येष्ठस्तद्विजयंतेद्वादशानुजस्तद्विजयंतेषचेतित्रिंशस्यंतेतान्कनीयान्त्समूहंत्यथयदिद्वौभवतोद्विरायाम्यःपिताथयद्येकोजायातृतीयाथयदि
नैवभवत्युभौद्विरायामौजायापतीएषएवत्रिधुन्यायएषएवद्वयोःकृतंकृतमित्येवव्यपगच्छंतिघृताग्नोरित्युल्कोत्तिष्ठंत्यथैभ्योबर्हिरादायगामुपाकरोतिपितृभ्य १५
स्त्वापितामहेभ्यस्त्वाप्रपितामहेभ्यस्त्वाजुष्टामुपाकरोमीतितूष्णीमित्येकेथैनामद्भिःप्रोक्षतिपितृभ्यस्त्वापितामहेभ्यस्त्वाप्रपितामहेभ्यस्त्वाजुष्टांप्रोक्षामीति

तूष्णीमित्येकेतामत्रैवप्रतीचीनशिरसींदक्षिणापदींसंज्ञपयंतितस्यैसंज्ञप्तायाअद्भिरभिषेकंप्राणानाप्याययतितूष्णींवपामुत्खिद्यहृदयमुद्धरतिप्रज्ञातानि
चावदानानिप्रज्ञातौचमतस्नौतान्येतस्मिन्शूलेश्रपनिहितेतस्मिन्नेवाग्नौश्रपयंतिश्रुतायांवपायांपंचस्रुवाहुतीर्जुहोति॥ १०॥याःप्राचीःसंभवंत्यापउत्तरतश्चयाः
॥अद्भिर्विश्वस्यभुवनस्यधर्त्रीभिरंतरन्यंपितुर्दधेस्वधानमःस्वाहा॥अंतर्दधेपर्वतैरंतर्मह्यापृथिव्या॥दिवादिग्भिरनंताभिरूतिभिरंतरन्यंपितामहाद्दधेस्व
धानमःस्वाहा॥अंतर्दधऋतुभिःसर्वैरहोरात्रैःससंधिकैः॥अर्धमासैश्चमासैश्चांतरन्यंप्रपितामहाद्दधेतिस्वधानमःस्वाहा॥यन्मेमाताप्रलुलोभचरत्यन
नुव्रता॥तन्मेरेतःपिताहंक्तामाभुरन्योपपद्यतांस्वधानमःस्वाहा॥यद्वःक्रव्यादंगमदहल्लोकानयन्प्रणयंजातवेदाः॥तद्वोअहंपुनरावेशयाम्यरिष्टाः
सर्वैरंगैःसंभवंतुपितरःस्वधानमःस्वाहेतित्रेधावपांविछिद्योदुंबर्याद्व्यांजुहोतिसोमायपितृमतेस्वधिनेजुहुमोहविः॥वाजिन्निदंजुषस्वनःस्वज्ञाहव्यं
देवेभ्यःपितृभ्यःस्वधानमःस्वाहा॥अंगिरसस्त्वंतमृतयेयमंपितृमंतमाहुवे॥वैवस्वतंदमक्षिनःस्वज्ञाहव्यंदेवेभ्यःपितृभ्यःस्वधानमःस्वाहा॥यदग्ने
कव्यवाहनपितॄन्यक्ष्यृतावृधः॥प्रदेवेभ्योवहाहव्यंपितृभ्यश्चस्वज्ञाहव्यंदेवेभ्यःपितृभ्यःस्वधानमःस्वाहेतितूष्णींदर्वीमभ्याधायपिंडानामावृतैता
न्यवदानानिददातिहृदयंमेचाग्रेयसम्नंनतस्नुमध्यदक्षिणमेतत्तेततासौयेचत्वामनुयांश्चत्वमत्रान्वस्यैषातेततस्वधाक्षितिर्यावतीपृथिवीतावती
तेमातात्रावर्तीतएतांमात्रांभूतांददामिपृथिव्यामितमसितत्तायमासैष्टाइतिद्वितीयंददात्येतत्तेपितामहासौयेचत्वामनुयांश्चत्वमत्रान्वस्यैषातेपिताम
हस्वधाक्षितिर्यावदंतरिक्षंतावतीतेमात्रातावतीतएतांमात्रांभूतांददाम्यंतरिक्षेणमितमसिपितामहायमासैष्टाइतितृतीयंददात्येतत्तेप्रपितामहासौयेचत्वा

Indira Gandhi National
Centre for the Arts

बौ० क० सू० मनुयाःश्वत्वमत्रान्वस्येषातेप्रपितामहस्वधाक्षितिर्यावतीद्यौस्तावतीतेमात्रावतीतएतांमात्रांभूतांददामिदिवामितमसिप्रपितामहायमाक्षिष्ठाइत्य
१६ अपितरोयथाभागंमंदध्वमित्युक्त्वात्रैकैकेनोदकुंभेनमार्जयतितूष्णीमंथेभ्योगामुपपरेत्यलोहितमुपप्रवर्तयन्यानिरक्षांस्यसृग्भागानियेत्वापिपित
रोरेहंतांविहरंतांतृप्यंतुरुधिरस्यते॥येनःपतितागर्भाअसृग्भाजउपासते॥तेभ्यःस्वजाःस्वधानतृप्णुवंतुमदंतुच॥यआमायेचपक्वायेचदुष्टाःपतंति
नः॥तेभ्यःस्व०॥येकुमारायास्त्रियोयेविज्ञाताःपतंतिनः॥तेभ्यःस्व०॥तुचेत्यागल्यांजनंददात्यथाभ्यंजनंददात्यथवासांसिददात्यथषड्भिर्नमस्कारै
र्विपर्यासमुपतिष्ठतेथवीरंमावतेथेनानुस्थाप्यप्रवाह्यतिसृभिर्मनआव्हयतेमनोन्वाहुवामहआनएतुमनःपुनःपुनर्नःपितरोमनइत्यत्रैतदहतंवासएवं
विदेब्राह्मणायदत्वान्यद्वसनीयंवासःपरिधायदक्षिणापपरेत्याद्भिर्मार्जयंत॥३३॥यासुगंधारसावर्णाबलंचनिहितेउभे॥तामआपःशिवाःसंतुदुष्कृतंप्र
वहंतुमे॥याऊर्जमभिषिंचंतिदेवप्रेषितामही॥तामआपःशि०मे॥यासांनिष्क्रमणेसर्वमिदंजायतेजगत्॥तामआ०मे॥यासामिमेत्रयोलोकास्तेजसाय
शसावृताः॥ताम०मे॥याःप्राचीर्यादक्षिणायाःप्रतीचीर्याउदीचीर्याऊर्ध्वारेवतीर्मधुमतीरापःस्रवंतिशुक्राः॥तामआ०तुमेइत्यत्रैतद्वसनीयंवासोविमु
च्यान्यत्परिधायप्राजापत्ययर्चाग्निरुदेतिप्रजातेनत्वंदतान्यन्यइत्यथोल्मुकमपिसृजत्यभूत्दूतोहविषोजातवेदाअवाड्व्यानिसुरभीनिकृत्वा॥प्रादाति १६
तृभ्यःस्वधयातेअक्षन्प्रजानन्नग्नेपुनरप्येहिदेवानित्यत्रैतान्यवदानानिब्राह्मणेभ्योददातिल्हदयमेवाग्रेथसव्यमतस्नुमथदक्षिणंयथाश्रधमन्नंकुरु
तेगामेतामंशाशाःकृत्वाब्राह्मणेभ्योवरंददात्यथैहयेकेचेतस्येमांसंलभंतेसर्वेहवाअस्यैतेगोभाजश्शोभवंत्यमात्यजयानभ्यातानानराष्ट्रभृतइतिकृत्वामात्य

होमंजुहोति॥एषहवाउपवसथउपह्यस्मिन्देवावसंतिप्रातर्जेष्यामोवामंवस्वित्येतद्वैदेवानांवामंवसुयदाग्नेयोष्टाकपालउपहैनंवामंवसुगच्छतियस्य
हवाएतामेवंविद्वान्गांकल्पयतेसर्वेपाप्मानंतरतितरतिब्रह्महत्यामपपुनर्मृत्युंजयते।तिहोवाचप्रजापतिस्तानिहवाएतानिकूश्मांडानीत्याचक्षतेका
जयानीतिवामात्यहोमाइतियातिमोक्षादितिवासयत्किंचास्मिंलोकेपापंकर्मकरोतिसर्वस्मात्तस्मान्निर्मुच्यानृणाःस्वर्गंलोकमेतीतिहोवाचप्रजापतिः॥
॥१२॥अग्नीनाधास्यमानोभवतिसउपकल्पयतउषाश्चसिकताश्चाखूत्करंचवल्मीकवपांचसूदंचवराहविहतंचपुष्करपर्णंचशर्कराश्चेत्यष्टौपार्थि
वाअथवानस्पत्याअश्वत्थश्चोदुंबरश्चपर्णश्चशमीचविकंकतश्चाशनिहतश्चशमीगर्भश्चावरणीमुंजकुलायंचित्रियस्याश्वत्थस्यतिस्रःसमिधआर्द्राःसप
लाशाःसप्ररोहाःप्रादेशमात्रीरप्रतिशुष्काग्राःषड्ढिरण्यशल्कान्त्रीन्सौवर्णान्त्रीन्राजतानश्वंपूर्ववाहंरथचक्रंब्राह्मौदनिकान्व्रीहीन्सर्वौषधं
गाह्रितंचर्मानडुहंनवानियज्ञपात्राणीत्यथास्माअरणीआहरतियोअश्वत्थःशमीगर्भआरुरोहत्वेसचा॥तंतेहरामिब्रह्मणायज्ञियैःकेतुभिःसहेत्यथातो
नक्षत्राणामेवमीमांसाकृत्तिकास्वग्निमादधीतरोहिण्यामग्निमादधीतपुनर्वस्वोरग्निमादधीतपूर्वयोफल्गुन्योरुत्तरयोःफल्गुन्योश्चित्रायामित्यथात
ऋतूनामेवमीमांसावसंतेब्राह्मणोग्निमादधीतग्रीष्मेराजन्यःशरदिवैश्योवर्षासुरथकारइत्यथोखलुयदैवैनंश्रद्धोपनमेनथादधीतसैवास्यर्धिरिति
दंतदार्त्तस्यातिचेलंवाश्रद्धायुक्तस्यार्थवैब्राह्मणंभवतियोरोहिण्यामग्निमादधीतऋध्नोत्येवसर्वान्रोहान्रोहतिसायावैशाख्याःपौर्णमास्याउपरिष्टादमा
वास्याभवतिसासकृत्संवत्सरस्यरोहिण्यासंपद्यतेतस्यामादधीतत्यथास्येतत्पुरस्तादेवजुष्टंदेवयजनेऽगारंवाविनिर्मितंवाकारितंभवतितस्यद्वेद्वारौकुर्वंति

Indira Gandhi National
Centre for the Arts

बौ०क० प्राचींचदक्षिणांचमध्येगार्हपत्यस्यायतनंकुर्वंतिपुरस्ताद्वादशसुप्रक्रमेष्वाहवनीयस्यापिवाचक्षुर्निमितेदक्षिणतोविषुवत्यन्वाहार्यपचनस्यापिवाय
१७ थाद्वौभागौप्राक्स्यातामेकःपश्चादित्येवंश्वोधोऽभ्यत्यावोऽस्मकेशश्मश्रुवपतेनखानिनिकृंततएवंपत्नीकेशवर्जमुभौमानुषेणालंकारेणालंकृतौभवतो
हतवाससावथाभ्यांव्रतोपायनीयंवाचयतितस्याशितौभवतःसर्पिर्मिश्रस्यपयोमिश्रस्यवा॥१३॥अथाधिवृक्षसूर्येयाचतिसर्वौषधमाज्यस्थाली
मस्कवांस्कत्वंबर्हिर्वासोदीप्यांश्चकलानित्यतत्समादायसंप्रक्षन्नाअंबरीषंवोत्तपनीयंवाभिप्रव्रजंतितस्मिन्दीप्याञ्छकलान्संप्रकीर्यबर्हिषापरिस्तीर्यआ
ज्यंविलाप्योत्पूयांजलिनोपस्तीर्णाभिघारितंसर्वौषधंजुहोत्यग्नयेसर्वौषधायपुष्ट्यैप्रजननायस्वाहेत्यथजयानभ्याताननूराष्ट्रभृतइतिहुत्वामात्यहोमान्
जुहोत्यथस्रुचिचतुर्गृहीतंगृहीत्वाप्राजापत्यांजुहोतिप्रजापतेनत्वदेतान्यन्यइत्यपरंचतुर्गृहीतंगृहीत्वानुख्यांजुहोत्यन्वग्निरुषसामग्रमख्यदन्वहानिप्र
थमोजातवेदाः॥अनुसूर्यस्यपुरुत्राचरश्मीननुद्यावापृथिवीआततानस्वाहेत्यथैतानंगारान्स्तैवाग्रागवेवायजमानोगृण्हात्यायुषेवोगृण्हामितेजसेवोगृ
ण्हामितपसेवोगृण्हामिवीर्यायवोगृण्हामिब्रह्मवर्चसायवोगृण्हामीत्यथैतानादायोत्तिष्ठत्यायुर्मामाविशतुभूतिर्मामाविशतुब्रह्मवर्चसंमाविशत्वि
तितानध्वर्यवेसंप्रदायोदायंत्यन्वारब्धेयजमानएतेनैवयथेतमेत्योत्तरेणागारंपरीत्यपूर्वयाद्वाराप्रपाद्यगार्हपत्यस्यायतनेन्युप्योपसमादधातिपरिस्त
णातिदक्षिणतउपविशतोब्रह्माचयजमानश्चाथैतद्रोहितंचर्मानडुहंजघनेनाग्निंप्राचीनग्रीवमुत्तरलोमोपस्तृणातितस्यवहलःकालेचतुरःपात्रान्व्रीही १७
न्निर्वपतिब्रह्मणेजुष्टंनिर्वपामीतिवातूष्णींवाऽथनिरुप्तानभिमृशत्याकूत्यैत्वाकामायत्वासमृधेत्वेत्यथैतान्व्रीहीनन्छूर्पसमुप्याद्भिरभ्युक्ष्यचर्मोदूहत्यथैतस्मिन्ने

वचर्मण्युलूखलमुसलेनिधायावहंत्यथैतेनैवपात्रेणचतुरउदपात्रानानयतियदिव्रीडितास्थालीभवतियद्युवाअव्रीडितापंचवाभूयसीवासस्मोदकःसंपद्य
ते॥१४॥तंयएवकश्चनकुशलःपचेधेनश्रपयित्वाभिघार्योदंचमुद्वासयत्यथैनमायतीगवमृत्विग्भ्यःप्राकुरूपसंगछंतएनमेतदृत्विजोथैतांपात्रीनिर्णिज्योप
स्तीर्यतस्यामेनमसंघ्नन्निवोध्दरतिसर्पिरामेचनंकृत्वाप्रभूतमाज्यमानीयाथैतस्यैवौदनस्योपघातंजुहोत्युपतिष्ठतेवाप्रचेधसेकवयेमेध्यायवचोवंदारुवृष
भायवृष्णे॥यतोभयमभयंतन्नोअस्त्ववदेवान्यजेहेड्यान्स्वाहेत्यथैतांश्चतुरआर्षेयानुत्तरतोनुदिशामुपवेश्यताननुपूर्वमाचमय्यतेभ्यएनंभूमिंस्पृशा
मनुच्छिदन्निवोपोहतित्रिःप्राश्यप्रशंसंतिराधस्तेब्रह्मौदनइतितेभ्यःसांडवत्सतरंददात्यथैषउत्तरतआसीनोब्राह्मणःक्षामकार्षंप्राश्नातितस्मैयदस्यो
पकल्पयंतेतद्ददात्यथयदाज्यमुच्छिष्यतेतेनसमिधोभ्यज्यादधातिसमिधाग्निंदुवस्यतघृतैर्बोधयतातिथिं॥आस्मिन्हव्याजुहोतनस्वाहा॥उपत्वाग्नेहविष्म
तीघृताचीर्यंतुहर्यत॥जुषस्वसमिधोममस्वाहा॥तंत्वासमिद्भिरंगिरोघृतेनवर्धयामसि॥बृहच्छोचायविष्ठ्यस्वाहेतिगायत्रीभिर्ब्राह्मणस्यत्रिष्टुभीराजन्य
स्यजिघर्म्यग्निमात्वाजिघर्म्यांसुदीअग्नेहविषांजुषाणाइतिजगतीभिर्वैश्यस्यतनस्यगोपाअस्तनिष्टत्तागविस्त्रामग्नेमानुषीरीडतेविशःसप्ततेअग्नेसमिधः
सप्तजिह्वाइतिसमित्सुवत्सतरींददात्यथास्माअरणीप्रयछन्नाहवाचंयमोभविष्यसिसंशाधियत्तेसंशिष्यमितिसआहब्राह्मणानाशयताश्वंगोपायत
संभारान्निधत्तेतितस्यसुरभिस्यमग्न्याधेयंभवतिसाग्न्याधेयस्यसमृद्धिस्तदाऊर्नाग्न्याधेयेगांकुर्वीतघोररूपमितिकुर्वीतैवापित्वेवनकुर्वीतापिवव्हीरि
तिकुर्वीतानुचैनस्यभवंत्युण्याप्रशंसेमिकान्योथास्माअरणीप्रयछतितेप्रतिगृण्हाति॥१५॥महीविश्पत्नीसदनेऋतस्यार्वाचीएतंधरुणेरयीणां॥अंतर्वत्नी

Indira Gandhi National
Centre for the Arts

बौ० कम: त्वंजातवेदसमध्वराणां जनयथः पुरोगां॥आरोहतं दशतं शक्वरीर्ममर्त्तेनाग्न आयुषा वर्चसा सह॥ज्योग्जीवंतउत्तरामुत्तरां समां दर्शमहं पूर्णमासं यज्ञं य
१८ थायजाइत्यर्थेनेत्वनिगृह्णात्युत्वियवती । रुक्मा अग्निरेतसोगर्भंदधाथांतेवामहं ददे॥यत्सत्यं यद्वारं विभृथोवीरं जनयिष्यथः॥तेमत्प्रातः प्रजनिष्येथेतेमाप्र
जातेप्रजनयिष्यथः॥प्रजयापशुभिर्ब्रह्मवर्चसेन स्वर्गेलोकइत्यर्थेन मन्त्रात्सत्यमुपनयतिमानुष्यादं समुपनयतिइदमहमनृतात्सत्यमुपैमिमानुषा
दैव्यमुपैमिदैवींवाचं यच्छामीतितं वाचं यमं रात्रिं जागरयंत आसतेशल्केस्तां रात्रिमग्निमिंधीतशल्के रग्निमिंधानउभौलोकौसनेमहं॥उभयोर्लोकयोर्ऋ
ध्वातिमृत्युंतराम्यहमित्युत्तरेणगार्हपत्यस्यायतनं कल्माषमजंबध्नातितेनैनमाधास्यमानं संख्यापयति प्रजा अग्ने संभवाशयाशा श्वपशुभिः सह॥रा
ष्ट्राण्यस्मा आधेहियान्यासंत्सवितुः सवइति॥१६॥अध्याय अथाध्वर्युरपररात्रआदुत्यारणी॥निष्टप्तिजातवेदोभुवनस्यरेतइहसिंचतपसोयज्ञनिष्यते॥
अग्निमश्वत्थादधिहव्यवाहं शमीगर्भाज्जनयन्योमयोभूः॥अयंतेयोनिर्ऋत्वियोयतोजातोअरोचथाः॥तंजानन्नग्नआरोहाथानोवर्धयारयिमित्यर्थेतमग्निं
मंतेसमुप्यदक्षिणतोज्वलयंतआसतेऽथैनान्यग्न्यायतनानि गोक्षुरपिंडेन परिलेपयत्यथतृतीयं संभाराणामादाय गार्हपत्यस्यायतने निवपति यत्पृथिव्या अना
मृतं संबभूवत्वेसचा॥तदग्निरग्नयेददात्तस्मिन्नाधीयतामयमिति सयत्रोषानुपाधिगच्छति तज्जपति यदश्चंद्रमसि कृष्णंतदपीहेत्यथैनानादधाति दिवस्त्वा १८
वीर्येणपृथिव्यैमहिम्ना अंतरिक्षस्यपोषेण सर्वपशुमादधइत्यथैनान्संप्रयौति संवः सृजामिहृदयानि संसृष्टं मनो अस्तुवः॥संसृष्टः प्राणो अस्तुवः॥
संयावः प्रियास्तनुवः संप्रियाहृदयानिवः॥आत्मावो अस्तु संप्रियः संप्रियास्तनुवोममेत्यथैनानकल्पयतिकल्पेतांद्यावापृथिवीकल्पंतामापओष

धीः कल्पंतामग्नयः पृथङ् ममज्यैष्ठ्यायसव्रताः॥येऽग्नयः समनसोंतराद्यावापृथिवीयासंतिकाष्टतू अभिकल्पमानाइंद्रमिवदेवा अभिसंविशंत्वित्य
थातिशिष्टानांसंभाराणामर्धानादायदक्षिणयाद्वारोपनिर्हृत्यान्वाहार्यपचनस्यायतनेनिवपतियदंतरिक्षस्यानामृतं संबभूवत्वेसचा॥तद्वायुरग्न
येददात्तस्मिन्नाधीयतामयमितिसयंनोषानुपाधिगच्छतितज्जपतियदश्चंद्रमसिकृष्णंतदपीहेतितथादधातितथासंप्रयौतितथाकल्पयत्यथैतेनैवय
थेतंमत्यातिशिष्टांत्संभारानादायपूर्वयाद्वारोपनिर्हृत्याहवनीयस्यायतनेनिवपतियद्दिवोनामृतं संबभूवत्वेसचा॥तदादित्योग्नयेददात्तस्मिन्नाधीय
तामयमितिसयत्रोषानुपाधिगच्छतितज्जपतियदश्चंद्रमसिकृष्णंतदपीहेतितथादधातितथासंप्रयौतितथाकल्पयत्यथगोमारंसमादिशतिसआहवित्ते
ता अग्नयोमाकश्चनांतरेणसंचारी॥दित्यथाध्वर्युः प्रदक्षिणमावृत्यप्रत्यङ्ङादुत्यस्यगार्हपत्यस्यायतनउपरिसंभारेषुमुंजकुलायंनिदधातितस्मिन्प्राचीन
प्रजननामधरारणिंनिधायदग्राहोत्रोत्तरारणिमवदधातिसआहमंथतेतियजमानानः प्रथमोमंथतियजमानउत्तमोमंथतिजनयतिजातेवरंददामीतिवा
चंविसृजतेऽथैनमुपतिष्ठते॥ जीजनन्नमृतंमर्त्यासोस्रेमाणंतरणिंवीडुजंभं॥दशस्वसारोअग्रुवः समीचीः पुमांसंजातमभिसंरभंतामित्यथैनमभिप्राणिति
प्रजापतेस्त्वाप्राणेनाभिप्राणिमिपूष्णः पोषेणमह्यं॥दीर्घायुत्वायशतशारदाय शतं शरद्भ्य आयुषे वर्चसे जीवात्वै पुण्याय प्रमाणेत्वामृतमादधामि॥अन्ना
दमन्नाद्याय॥गोमारं गुप्त्या इत्यथानुगातारमाहरथंतरंब्रूहीत्यथैनमादधातिभूर्भुवोघर्मः शिरस्तदयमग्निः संप्रियः पशुभिर्भुवत्॥छर्दिस्तोकायतनमाय
यच्छभृगूणांत्वांगिरसांव्रतपतेव्रतेनादधामीतिभृग्वंगिरसामादध्यादादित्यानांत्वादेवानांव्रतपतेव्रतेनादधामीत्यन्यासांब्राह्मणीनांप्रजानांवरुणस्यत्वाराज्ञो

Indira Gandhi National
Centre for the Arts

बौ० क० सू० व्रतपते व्रतेनादधामीति राज्ञ इंद्रस्येंद्रियेण व्रतपते व्रतेनादधामीति राजन्यस्य मनोस्त्वा ग्रामण्या व्रतपते व्रतेनादधामीति वैश्यस्य ऋभूणां त्वा देवानां व्रतप
१० तेव्रतेनादधामीति रथकारस्येति यथर्षि यथा गोत्रं गायत्रेण छंदसेत्युत्तरतो हिरण्यशल्कमुपास्यति स्वयातनुया संभवेत्यथैतं राजतं हृषलाय वा ज्ञाताय वा
ति प्रयच्छत्यार्तिमेवातिप्रयच्छतीति ब्राह्मणमथैनमुपतिष्ठते हं त्वदस्मि मदसि त्वमेतन्ममासि योनिस्तव योनिरस्मि॥ ममैव सन्वह हव्यान्यग्ने पुत्रः पित्रे
लोककृज्जातवेदः॥ सुगार्हपत्यो विदहन्नरातीरुषसः श्रेयसीः श्रेयसीर्दधत॥ अग्ने सपत्नाँ अपबाधमानो रायस्पोषमिषमूर्जमस्मासु धेहीति॥१७॥ अथै
तमग्निमादद्ते यएष संतसमुप्तो भवति तं दक्षिणया द्वारोपनिर्हृत्यान्वाहार्यपचनमादधाति भूर्भुवो वातः प्राणस्तदयमग्निः संप्रियः पशुभिर्भुवत्॥ स्वदितं तो
कायतनयाय पितुं पच॥ अमीषां त्वा देवानां व्रतपते व्रतेनादधामीति यथर्षि यथा गोत्रं गायत्रेण छंदसेत्युत्तरतो हिरण्यशल्कमुपास्यति स्वयातनुया संभवेति
॥ अथैतं राजतं हृषलाय वा ज्ञाताय वा तिप्रयच्छत्यार्तिमेवातिप्रयच्छतीति ब्राह्मणमपि वा गार्हपत्याद्देवान्वाहार्यपचनमादधाति प्रजापतिरग्निमसृजत सोबिभे
त्प्रमाधक्ष्यतीति तस्य त्रेधा महिमानं व्यौहच्छांत्या अप्रदाहायेन्यैतस्मात् ब्राह्मणादथैनमुपतिष्ठत इमा उमामुपतिष्ठं तुराय आभिः प्रजाभिरिह संवसेय॥ इहो
र्जा तिष्ठतु विश्वरूपी मध्ये वसोर्दीदिहि जातवेद इत्यथैतेनैव यथेतमेत्याभ्यादधातीध्मं प्रणयनीयं तं तथाभ्यादधाति यथा मन्यते धोदितं सूर्य आहवनी
यआधीयमानः संपत्स्यत इति तस्य तथा संपद्यत उपोपयमनीः कल्पयंत्यश्व एष पूर्ववाट् पल्पूलितः पुरस्तात्तिष्ठत्यथोद्गातारमाह वामदेव्यं ब्रूहीत्य १०
थैनमुपच्छत ओजसे बलाय त्वोद्यच्छे वृषणे शुष्मायायुषे वर्चसे सपत्नतूरसि वृत्रतूर्यस्ते देवेषु महिमा सुवर्गाय स्त आत्मा पशुषु प्रविष्टः पुष्टिर्याते मनुष्ये

षु पप्रथे तया नो अग्ने जुषमाण एहि॥ दिवः पृथिव्याः पर्यंतरिक्षाद्वातात्पशुभ्यो अध्योषधीभ्यः॥ यत्र यत्र जातवेदः संबभूथ ततो नो अग्ने जुषमाण एहि
तीयत्स्यग्रहरत्यथ यत्यथ यत्यधोधः शिरो हरतीति ब्राह्मणमाददान एवैतामात्रा अभिसंपादयेदित्येतदपरमश्वं पूर्वेनयंतितमनुमंत्रयते प्राचीमनु प्रदिशं प्रे
हि विद्वानग्नेरग्ने पुरो अग्निर्भवेह॥ विश्वा आशा दीद्यानो विभाह्यूर्जं नो धेहि द्विपदे चतुष्पद इति विष्वक्स्तु परमतिक्रमस्व महाँ असि विदिवज्ञानुषेयः॥ वि
षु लोकेषु ज्ञा गृहीत्यथोपातिर्यत्यन्वग्निरुषसामग्रमख्यदन्वहानि प्रथमो जातवेदाः॥ अनु सूर्यस्य पुरुत्रा च रश्मीननु द्यावापृथिवी आततानेत्यथैनमश्वेन ते
प्राचोत्तरतः पार्श्वतः संभाराणामाक्रमयति यथाहितस्याग्रेरंगारा अभ्यववर्तेरन्नित्यथैनं प्रदक्षिणमावृत्याङ्गिरभ्युक्ष्योदंचमुत्सृजति स एषोध्वर्योर्भवत्यन्यं ब्र
ह्मणे दद्यात्स्यथ प्रदक्षिणमावृत्यैध्मं प्रतिष्ठापयति दिर्देदिवो यद्दः पृथिव्याः संविदाने रोदसी संबभूवतुः॥ तयोः पृष्ठे सीदतु जातवेदाः शंभूः प्रजाभ्यस्तन्वे
स्योनः॥ प्राणं त्वामृत आदधाम्यन्नादमन्नाद्याय गोप्तारं गुप्त्या इत्यथोद्गातारमाह वृहद्रथंतरी यज्ञायज्ञीयेति तमिति साम गायेति सर्वाणि संप्रेष्यद्वृहतिगीयमा
न आहवनीयमादधाति भूर्भुवः सुवरर्कः श्वस्कस्तदसौ सूर्यस्तदयमग्निः संप्रियः पशुभिर्भुवत्॥ यत्ते शुक्र शुक्रं वर्चः शुक्रा तनूः शुक्रं ज्योतिरजस्रं॥ तेन मे दीदि
हि तेन त्वादधे॥ अग्निनाग्ने ब्रह्मणा॥ अमीषां त्वा देवानां व्रतपते व्रतेनादधामीति यथर्षि यथा गोत्रं गायत्रेण छंदसेत्युत्तरतो हिरण्यशल्कमुपास्यति स्वयात
नुया संभवेत्यथैतं राजतं हृषलाय वा ज्ञाताय वा तिप्रयच्छत्यार्तिमेवातिप्रयच्छतीति ब्राह्मणमथैनमुपतिष्ठत आ न रोव्यानश्रोसर्वमायुर्व्यानशाइत्यत्रैतावग्नी
आदधाति सभ्यं चावसथ्यं चाथ रथचक्रं प्रवर्तयति संततं गार्हपत्यादाहवनीयात्॥ १८॥ सर्वौषधेन व्याहृतिभिरग्नीन्छमयित्वा पंच पंचनानाहस्तीयाः स

Indira Gandhi National
Centre for the Arts

बौ॰ क॰ सू॰ मिधीभ्यज्यादधातिसमिध्यमानःप्रथमोनुधर्मइत्येताभिःपंचभिरायुर्दाअग्नेहविषोजुषाणइत्येतामपोधृत्याथप्रदक्षिणमावृत्यप्रत्यङ्ङावृत्यजघनेनगार्ह
२० पत्यंतिष्ठꣳस्तनूभिरुपतिष्ठतेयेतेअग्नेशिवेतनुवौ॥विराट्चस्वराट्च॥तेमाविशतांतेमाजिन्वतां॥येतेअग्नेशिवेतनुवौ॥संम्राट्चाभिभूश्च॥तेमाविशतांतेमा
जिन्वतां॥येतेअग्नेशिवेतनुवौ॥विभूश्चपरिभूश्च॥तेमाविशतांतेमाजिन्वतां॥येतेअग्नेशिवेतनुवौ॥प्रभ्वीश्चप्रभूतिश्च॥तेमाविशतांतेमाजिन्वतां॥यास्ते
अग्नेशिवास्तनुवस्ताभिस्त्वादधइतिसर्वाभिर्गार्हपत्यंसर्वाभिरन्वाहार्यपचनंसर्वाभिराहवनीयमथघोरास्तनूरनुदिशतियास्तेअग्नेघोरास्तनुवस्ताभिर
मुंगच्छेत्यत्रयंयजमानोद्विष्टितंमनसाध्यायेदित्यथापउपस्पृश्यविराजकंमेरुपतिष्ठतेनर्यप्रजांमेगोपाय॥अमृतत्वायजीवसे॥जातांजनिष्यमाणांच॥अ
मृतेसत्येप्रतिष्ठितामितिगार्हपत्यमथर्वपितुंमेगोपाय॥रसमन्नमिहायुषे॥अदब्धायोशीततनो॥अविषन्नःपितुंकृण्वित्यन्वाहार्यपचनं॥शꣳस्यपशू
न्मेगोपाय॥द्विपादोयेचतुष्पदः॥अष्टाशफाश्चयइहाग्ने॥येचैकशफाआशुगाइत्याहवनीयं॥सप्रथसभांमेगोपाय॥येचसभ्याःसभासदः॥तानिंद्रिया
वतःकुरु॥सर्वमायुरुपासतामितिसभ्यं॥अहेबुध्नियमंत्रंमेगोपाय॥यमृषयस्त्रयिविदाविदुः॥ऋचःसामानियजूꣳषि॥साहिश्रीरमृतासतामित्यावस
थीयं॥अथगार्हपत्यआज्यंविलाप्योत्पूयस्रुचिचतुर्गृहीतंगृहीत्वासमिद्वत्याहवनीयेपूर्णाहुतिंजुहोतिसप्ततेअग्नेसमिधःसप्तजिह्वाइतिपूर्णाहुतौवरंददात्य
थैतान्यग्निहोत्रपात्राणिप्रक्षालितान्युत्तरेणगार्हपत्यमुपसादयतिकूर्चेवास्तुनायांवास्थालींसस्रुवांस्रुचमभिधानींसमिधमित्यथैतामग्निहोत्रींदक्षिणतउदीचीं २०
स्थापयित्वाआलंभयाचादोग्धीपूर्वौदुह्यादपरौदुह्यान्नसंमृशेतद्वयोर्दुह्यात्पशुकामस्येत्यधिश्रित्यान्तरमानयत्यथैतदग्निहोत्रमग्रेणाहवनीयंपर्याहृत्यपूर्वयाद्वारा

शालांप्रपाद्यजघनेनगार्हपत्यमुपसाद्यतस्मिन्नग्निहोत्रविधिंचेष्टित्वासमिधमुपयत्यप्राङ्हरतिजघनेनाहवनीयमुपसादयतिकूर्चेत्रेताꣳसमिधंमध्यतआ
हवनीयस्याभ्यादधातितूष्णीतस्यामादीप्तायांप्रतिमुखंद्विर्जुहोतिऊर्ध्वंमार्ष्टवाचमार्ष्टंभयमेवाप्नोतीतिब्राह्मणंद्विरंगुल्याप्राश्योदङ्पर्यावृत्यप्राचीनदंड्या
स्रुचाभस्मयतिनिर्णिज्यस्रुचंनिष्टप्याद्भिःपूरयित्वोदगुद्दिशतिसप्तर्षीन्प्रीणातीतिब्राह्मणंकृत्वोपसमिधंब्रह्मवर्चसस्यसमिध्याअपोनिनयत्यवभृथस्यैव
रूपमकरितिब्राह्मणं॥१९॥अथपरिकर्मिणंबर्हिर्लावंप्रहिणोत्यभ्याहृतंवायजुषाकरोत्यथष्टब्याꣳस्तीर्त्वापःप्रणीयाग्नेयमष्टाकपालंनिर्वपस्यन्दशहो
तारंव्याचक्षीतसामिधेनीरनुवक्ष्यन्दशहोतारंव्याचक्षीतश्रपयित्वासादयतितस्याःपंचदशसामिधेन्यःपंचप्रयाजाआवाराघारावाज्यभागावथहविषोग्निर्मू
र्धाभुवइतित्रिष्टुभौसंयाज्येन्वाहार्यमासाद्याग्न्याधेयदक्षिणाददात्याद्वादशभ्योददातिकामंभूयसीर्ददातिसंतिष्ठतएषेष्टिःसपूर्णपात्रविमुक्तमानविसृज
तेव्रतमथतदानीमेवष्टब्याꣳस्तीर्त्वापःप्रणीयैंद्राग्नमेकादशकपालंनिर्वपत्यादित्यंचरुंघृतएषचरुर्भवतिश्रृतेनेदीयसिवाज्यमानयतिश्रपयित्वासादय
तितस्याःपंचदशसामिधेन्यःपंचप्रयाजाआघारावाज्यभागावथहविषइंद्राग्नीरोचनादिवःश्नथद्वृत्रमित्यैंद्राग्नस्यादितिर्नउरुष्यतुमहीमूषुमातरमित्यादि
त्यस्यत्रिष्टुभौसंयाज्येन्वाहार्यमासाद्याथैनंचरुंव्युद्धृत्यचत्वारआर्षेयाःप्राश्नंतिदिशामेवज्योतिषिजुहोतीतिब्राह्मणंसंतिष्ठतएषेष्टिःसपूर्णपात्रविमुक्त
मविसृजतेव्रतमत्रैनद्वादशाहंव्रतंचरति॥२०॥तस्यैतद्व्रतंनानृतंवदतिनमाꣳसमश्नातिनस्त्रियमुपैतिनास्यपल्पूलनेनवासःपल्पूलयंत्यस्मृन्मयपा
त्र्यशूद्रोच्छिष्टीस्वयंपादौप्रक्षालयतेनलवणमश्नातिनकोशीधान्यमन्यत्रतिलेभ्यःप्राङुच्चास्यस्वयꣳसमिधआहरमाणोग्नीनामंतेसंविशत्यजस्राअस्यैतेद्वा

Indira Gandhi National
Centre for the Arts

बौ०क०सू० दशाहमग्नयो भवंतिनास्य ब्राह्मणो नाश्वान् गृहे वसेदित्यग्निहोत्रोच्छेषणकृतो वा यजमानो भवतिभक्तमुपपत्न्या आहरत्यथ द्वादशाहव्युष्टासु पष्ठ्यां
२३ स्तीर्णापः प्रणीयाग्नये पवमानाय पुरोडाशमष्टाकपालं निर्वपति श्रपयित्वासादयति तस्याः पंचदश सामिधेन्यः पंच प्रयाजा वार्त्रघ्नावाज्यभागावथ
हविषोग्न आयूंषि पवस इत्यग्ने पवस्वेति त्रिष्टुभौ संयाज्ये न्वाहार्यमासाद्य त्रिंशन्मानं हिरण्यं ददाति संतिष्ठत एषेष्टिः स पूर्णपात्रविमुक्तमा विसृ
जते व्रतमथ तदानीमेव षष्ठ्यां स्तीर्णापः प्रणीयाग्नये पावकाय पुरोडाशमष्टाकपालं निर्वपत्यग्नये शुचये श्रपयित्वासादयति तस्याः पंचदश सा
मिधेन्यः पंच प्रयाजा वार्त्रघ्नावाज्यभागावथ हविषोरग्ने पावक स नः पावकाग्निः शुचिव्रततम उदग्ने शुचय स्तवेति त्रिष्टुभौ संयाज्ये न्वाहार्यमासा
द्य त्रिंशन्माम चत्वारिंशन्मानं हिरण्यं ददाति संतिष्ठत एषेष्टिः स पूर्णपात्रविमुक्तमा विसृजते व्रतं ॥ २३ ॥ अथातोन्वारंभस्यैवमीमांसान्वारंभ पौर्ण
मास्याः समानोपवसथं करोत्यथ प्रातर्हुतेग्निहोत्रे पुरा वा प्रणयनाद्गार्हपत्य आज्यं विलाप्योत्पूय स्रुचि चतुर्गृहीतं गृहीत्वा चतुर्होतारं मनसानुद्रुत्या
हवनीये जुहोत्यन्वारब्धे यजमाने स्वाहेत्यपरं चतुर्गृहीतं गृहीत्वा सारस्वतो होमौ जुहोति पूर्णा पश्चादित्यनुद्रुत्याग्नी षोमाविति जुहोत्यपरं चतुर्गृहीतं गृही
त्वा निवेशनी संगमनी वसूनामित्यनुद्रुत्य यत्ते देवा अदधुर्भागधेयमिति जुहोत्यथ षष्ठ्यां स्तीर्णापः प्रणीयाग्नावैष्णवमेकादशकपालं निर्वपति सरस्व
त्यै चरुं सरस्वते द्वादशकपालमिति श्रपयित्वासादयति तस्याः पंचदश सामिधेन्यः पंच प्रयाजा वार्त्रघ्नावाज्यभागावथ हविषोग्ना विष्णू अग्ना विष्णू प्रणो २३
देव्या नो दिवः पीपिवांसं सरस्वतस्तनं ये ते सरस्व ऊर्मय इति त्रिष्टुभौ संयाज्ये न्वाहार्यमासाद्य मिथुनौ गावौ ददाति संतिष्ठत एषेष्टिः स पूर्णपात्रविमुक्त

मानं विसृजते व्रतमथ पौर्णमासेनैव मृधाभ्यां यजते संतिष्ठतेग्न्याधेयं संतिष्ठतेग्न्याधेयं ॥ २२ ॥ ॥ इति बौधायनकल्पसूत्रे आधानप्रकरणं तृतीयः प्र
श्नः ॥ तृतीयेत्तृतीयोध्यायः ॥ ३ ॥ ॥ अग्नीन् पुनराधास्यमानो भवति तदाहुः कृतयजुः संभृतसंभारो भवति न संभृत्या संभारान यजुः कार्यमित्यथो ख
लु संभृत्या एव संभाराः कार्यं यजुः पुनराधेयस्य समृध्या इति स उपवसथं त्यजते पुनर्निष्कृतं रथं पुनरुत्स्यूतं वासः पुनरुत्सृष्टमनड्वाहं दर्भकुलायं ति स्त्रो दर्भम
यीर्बिमूर्मिकाः प्रज्ञाता अग्न्याधेयिकाः संभाराः सा या आषाढ्याः पौर्णमास्याः पुरस्तादमावास्या भवति मा सहस्रसंवत्सरस्य पुनर्वसुभ्यां संपद्यते तस्या
मादधीतेति तस्या उपवसथे रण्यारग्नी त्समारोह्योदवसाय मथित्वाग्नी न्विहृत्याग्नेयमष्टाकपालं निर्वपति वैश्वानरं द्वादशकपालमग्निमुद्वासयिष्य
न्निति साप्रसिद्धेष्टिः संतिष्ठते तदानीमेवाद्भिरग्नीन्त्सामुष्य ब्रह्मौदनं श्रपयित्वोपवसमतित्यथ प्रातरग्न्याधेयिकं कर्मतायत एतावदेव नानायदमुत्रमुं
जकुलायं तदिह दर्भकुलायं यो मुत्रेध्मः प्रणयनीयः स इह दर्भमयी विसृ ... दर्भैर्गार्हपत्यमादधाति दर्भैरन्वाहार्यपचनं दर्भैराहवनीयं दर्भैर्गार्हपत्यमादधा
त्याधानं सर्परात्रीं कं चोनुवर्तयति भूमिर्भूम्ना ॥ १ ॥ भूमिर्भूम्ना द्यौर्वरिणेति च तस्त्रो गार्हपत्ये तिस्र आहवनीये समानं कर्मारश्मय क्रादेतावदेव नानायद
मुत्र तद्धर्मामग्निहोत्रं जुहोति तदिह सप्त ते अग्ने समिधः सप्त जिह्वा इति जुहोति यो मुत्राग्नेयोष्टाकपालः स इहाग्नेयः पंचकपालस्तस्य प्रयाजेषु च तस्त्रो विभ
क्तीर्दधात्यग्न आयाहि वीतये समिधः समिधाग्न आज्यस्य वियंत्वग्निर्दूतं वृणीमहे तनूनपादग्न आज्यस्य वेत्वग्निनाग्निः समिध्यत इडो अग्न आज्यस्य
वियंत्वग्निर्वृत्राणि जंघनद्बर्हिरग्न आज्यस्य वेत्विति स्वयं संपन्न उत्तमप्रयाजो थात आज्यभागयोरेव मीमांसा वार्त्रघ्नावाज्यभागौ स्यातामित्येके दधन्वंता

Indira Gandhi National
Centre for the Arts

बौं॰क॰सू॰ दशाहमग्नयोभवंतिनास्यब्राह्मणोनाश्वान्गृहेवसेदित्यग्निहोत्रोछेषणव्रतोवायजमानोभवतिभक्तमुपपत्न्याआहरत्यथद्वादशाम्व्युष्टासुइष्ट्यां
२३ स्तीर्णोपःप्रणीयाग्नयेपवमानायपुरोडाशमष्टाकपालंनिर्वपतिश्रपयित्वासादयतितस्याःपंचदशसामिधेन्यःपंचप्रयाजाआघारावाज्यभागावथ
हविषोग्नआयूंषिपवसेग्नेपवस्वेतित्रिष्टुभौसंयाज्येन्वाहार्यमासाद्यत्रिंशन्मानंहिरण्यंददातिसंतिष्ठतएषेष्टिःसपूर्णपात्रविमुक्तमाविसृ
जतेव्रतमथतदानीमेवष्टध्यांस्तीर्णोपःप्रणीयाग्नयेपावकायपुरोडाशमष्टाकपालंनिर्वपत्यग्नयेशुचयेश्रपयित्वासादयतितस्याःपंचदशसा
मिधेन्यःपंचप्रयाजाआघारावाज्यभागावथहविषोरग्नेपावकसनःपावकाग्निःशुचिव्रततमउदग्नेशुचयस्तवेतित्रिष्टुभौसंयाज्येन्वाहार्यमासा
द्यत्रिंशन्मामचत्वारिंशन्मानंहिरण्यंददातिसंतिष्ठतएषेष्टिःसपूर्णपात्रविमुक्तमाविसृजतेव्रतं॥२१॥अथातोन्वारंभणीयेवमीमांसान्वारंभणीयापौर्ण
मास्याःसमानोपवसथंकरोत्यथप्रातर्हुतेग्निहोत्रेपुरापांप्रणयनाद्गार्हपत्यआज्यंविलाप्योत्पूयस्रुचिचतुर्गृहीतंगृहीत्वाचतुर्होतारंमनसानुद्रुत्या
हवनीयेजुहोत्यन्वारब्धेयजमानेस्वाहेत्यपरंचतुर्गृहीतंगृहीत्वासारस्वतौहोमौजुहोतिपूर्णापश्चादित्यनुद्रुत्याग्नीषोमावितिजुहोत्यपरंचतुर्गृहीतंगृही
त्वानिवेशनीसंगमनीवसूनामित्यनुद्रुत्ययत्तेदेवाअदधुर्भागधेयमितिजुहोत्यथष्टध्यांस्तीर्णोपःप्रणीयाग्नावैष्णवमेकादशकपालंनिर्वपतिसरस्व
त्येचरुंसरस्वतेद्वादशकपालमितिश्रपयित्वासादयतितस्याःपंचदशसामिधेन्यःपंचप्रयाजाआघारावाज्यभागावथहविषोग्नाविष्णूअग्नाविष्णूप्रणो २१
देव्यानेदिकःपीपिवांसंसरस्वतस्तनंयेतेसरस्वऊर्मयइतित्रिष्टुभौसंयाज्येन्वाहार्यमासाद्यमिथुनौगावौददातिसंतिष्ठतएषेष्टिःसपूर्णपात्रविमुक्त

मानंविसृजतेव्रतमथपौर्णमासंवैमृधाभ्यांयजतेसंतिष्ठतेग्न्याधेयंसंतिष्ठतेग्न्याधेयं॥२२॥ ॥इतिबौधायनकल्पसूत्रेआधानप्रकरणंतृतीयःप्र
श्नः॥तृतीयेतृतीयोध्यायः॥३॥ ॥अग्नीन्पुनराधास्यमानोभवतितदाहुःहृतयजुःसंभृतसंभारोभवतिनसंभृत्यासंभारानयजुःकार्यमित्यथोख
लुसंभृत्याएवसंभाराःकार्ययजुःपुनराधेयस्यसमृध्याइतिसउपकल्पयतेपुननिष्कृतंरथंपुनरुत्स्यूतंवासःपुनरुत्सृष्टमनड्वाहंदर्भकुलायंतिस्रोदर्भम
यीर्विसूर्मिकाःप्रज्ञाताअग्न्याधेयिकाःसंभाराःसायाआषाढ्याःपौर्णमास्याःपुरस्तादमावास्याभवतिमासहृत्संवत्सरस्यपुनर्वसुभ्यांसंपद्यतेतस्या
मादधीतेतितस्याउपवसथेरण्योरग्नीन्समारोह्योदवसायमथित्वाग्नीन्विहृत्याग्नेयमष्टाकपालंनिर्वपतिवैश्वानरंद्वादशकपालमग्निमुद्वासयिष्य
न्नितिसाप्रसिद्धेष्टिःसंतिष्ठतेतदानीमेवाङ्गिरग्नीन्सामुष्यब्रह्मौदनंश्रपयित्वोपवमतित्यथप्रातरग्न्याधेयिकंकर्मतायतनएतावदेवनानायदमुत्रमुं
जकुलायंतदिहदर्भकुलायंयोमुत्रेध्मःप्रणयनीयःसेहदर्भमयीर्विसूर्मिकादर्भैर्गार्हपत्यमादधातिदर्भैरन्वाहार्यपचनंदर्भैराहवनीयंदर्भैर्गार्हपत्यमादधा
त्याधानंसर्परात्र्यर्कःचोनुवर्तयतिभूमिर्भूम्ना॥१॥भूमिर्भूम्नाद्यौर्वरिणेतिचतस्रोगार्हपत्येतिस्रआहवनीयेसमानंकर्मारथचक्रादेतावदेवनानायद
मुत्रतूष्णीमग्निहोत्रंजुहोतितदिहसप्ततेअग्नेसमिधःसप्तजिह्वाइतिजुहोतियोमुत्राग्नेयोष्टाकपालःसइहाग्नेयःपंचकपालस्तस्यप्रयाजेषुचतस्रोविभ
क्तीर्दधात्यग्नआयाहिवीतयेसमिधःसमिधोअग्नआज्यस्यवियंत्वग्निर्वृत्रंवृणीमहेतनूनपादग्नआज्यस्यवेत्वग्निनाग्निःसमिध्यतइडोअग्नआज्यस्य
वियंत्वग्निर्वृत्राणिजंघनद्बर्हिरग्नआज्यस्यवेत्वितिस्वयंसंपन्नउत्तमप्रयाजोथातआज्यभागयोरेवमीमांसाघारावाज्यभागौस्यातामित्येकेहधन्वंता

Indira Gandhi National
Centre for the Arts

बौ०क०सू० वाज्यभागौस्यातामित्येकेऽग्निं स्तोमेन बोधयत्वंनः सोमेत्येतौस्यातामित्येकेऽग्नआयूंषिपवसेऽग्नेपवस्वेत्येतौस्यातामित्येके यत्सवमानंतत्सोमरू
२२ पंपंत्त्येवाहविषोऽग्नेतमद्याधान्यग्नइत्यथपुनरूर्जासहरय्येत्यभितः पुरोडाशमाहुतीजुहोत्यग्निं प्रतिस्विष्टकृतंनिराहाभिंष्टअद्यएभिर्नोअर्कैरितिसंया
ज्येन्वाहार्यमासाद्यपुनराधेयदक्षिणाददाति॥ २॥पुनराधेयदक्षिणाददातिपुनर्निष्कृतंरथंपुनरुत्स्यूतंवासःपुनरुत्सृष्टमनड्वाहंतस्यानुयाजेषु
विभक्तीर्दधातिअग्नायोमर्त्योदुबोधियंजुज्जोषधीतिभिः॥भसन्नुषप्रपूर्व्यइषंवुरीतावसेदेवंबर्हिर्वसुवनेवसुधेयस्यवेत्वग्नेस्तोमंमनामहेसिध्रम
द्यदिविस्पृशः॥देवस्यद्रविणस्यवोदेवोनराशंसोवसुवनेवसुधेयवेस्येत्वितिस्वयंसंपन्नउत्तमोनूयाजःसंतिष्ठतएषेष्टिःसपूर्णपात्रविमुक्रमाविसृजते
व्रतमथतदानीमेवष्टव्याः स्तीर्वापःप्रणीयाग्निवारुणमेकादशाकपालंनिर्वतिश्रपयित्वासादयतितस्याःपंचदशसामिधेन्यःपंचप्रयाजावार्त्रघ्नावा
ज्यभागावथहविषत्वंनोअग्नेसत्वंनोअग्नइतित्रिष्टुभौसंयाज्येन्वाहार्यमासाद्यानड्वाहंददातिसंतिष्ठतएषेष्टिःसपूर्णपात्रविमुक्रमाविसृजतेव्रतं
संतिष्ठतेपुनराधेयमितिदधिपुनराधेयध्रीयमथवैभवतियःपराचीनंपुनराधेयादग्निमादधीतसएतान्होमान्जुहुयादितितृतीयआधानआग्ने
यस्यपंचकपालस्यपुरस्तात्स्विष्टकृतःस्रुवाहुतीरुपजुहोतिलेकःसलेकःसुलेकस्तेनआदित्याआज्यंजुषाणावियंतुस्वाहाकेतःसकेतःसकेतस्तेनः २२
आदित्याआज्यंजुषाणावियंतुस्वाहाविवस्वांअदितिर्देवजूतिस्तेनआदित्याआज्यंजुषाणावियंतुस्वाहेतिसंतिष्ठतेतृतीयमाधानमथापद्धताग्नेर्नष्टा
रणीकस्यप्रगणयनब्रह्मौदनेनैवप्रतिपद्यतेसिध्रमग्न्याधेयं॥ ३॥इतिप्रथमः॥पुरादित्यस्यास्तमयात्गार्हपत्यमुपसमाधायान्वाहार्यपचनमाहृत्य

ज्वलंतमाहवनीयमुद्धरतिसायमाहुतयेपुरादित्यस्योदयातगार्हपत्यमुपसमाधायान्वाहार्यपचनमाहृत्यज्वलंतमाहवनीयमुद्धरतिप्रातराहुतये
याचाहोत्राप्राणेनोद्गात्राचक्षुषाध्वर्युणामनसाब्रह्मणाश्रोत्रेणाग्नीधेतेस्त्वापंचभिर्दैव्यैर्ऋत्विग्भिरुद्धराभिर्भूर्भुवःसुवरुध्रियमाणउद्धरपाप्मनोमावद
विद्वान्यच्चविद्वांश्चकार॥अन्हायदेनःकृतमस्तिपापंसर्वस्मान्मोद्धृतोमुंचतस्मादितिसायंरात्रियायदेनःकृतमस्तिपापंसर्वस्मान्मोद्धृतोमुंचत
स्मादितिप्रातरग्निंनिदधात्यमृताहुतिममृतायांजुहोम्यग्निंपृथिव्याममृतस्यजित्यै॥तयानंतंकाममितोजयेमप्रजापतिर्यंप्रथमोजिगायाग्निमग्नौ
वैश्वानरेमृतंजुहोमिस्वाहेतिसायंसूर्यमग्नौवैश्वानरेमृतंजुहोमिस्वाहेतिप्रातःसायंप्रातरेवैयापत्न्यन्वास्तेसायंसायमित्येकेथैतान्यग्निहोत्र
पात्राणिप्रक्षालितान्युत्तरेणगार्हपत्यमुपसादयतिकूर्चंचासूनायांवास्थालींस्रुचंस्रुवंचमभिद्योतनंसमिधमित्यथैतामग्निहोत्रींदक्षिण
तउदीचींस्थापयित्वाब्राह्मणोदोग्धिपूर्वौदुह्याज्येष्ठस्यज्येष्ठिनेयस्ययोवागतश्रीःस्यादपरौदुह्यात्कनिष्ठस्यकानिष्ठिनेयस्ययोवाबुभूषेन्नसंमृत्रो
हयादुह्यात्पशुकामस्यत्सधिश्रित्योत्तरमानयत्यथैतदग्निहोत्रमग्रेणाहवनीयंपर्याहृत्यपूर्वयाद्वाराप्रपाद्यजघनेनगार्हपत्यमुपसाद्याथपरिषिं
चतिऋतंत्वासत्येन॥ ४॥ऋतंत्वासत्येनपरिषिंचामीतिसायंपरिषिंचतिसत्यंत्वर्त्तेनपरिषिंचामीतिप्रातरेवमेवहुत्वापरिषिंचत्यथप्रदक्षिणमा
हृत्यप्रत्यङ्ङुदुत्यजघनेनगार्हपत्यमुपविश्योदीचोंगारान्निरूह्यव्यंतान्कृत्वातेष्वधिश्रित्याऽभिद्योतनेनाभिद्योतयत्यग्निस्तेतेजोमाप्रतिधाक्षीदि
तिस्रुवेणापःप्रत्यानयत्यृतमसीतिपुनरेवाभिद्योत्यत्रिःपर्यग्निकरोत्यंतरितंरक्षोंतरिताअरातयइतिवर्त्मकुर्वन्नुदगुद्वास्यप्रत्यूह्यांगारानास्ते

Indira Gandhi National
Centre for the Arts

बौ० श्रौ० सू० दक्षिणेनस्रुवंसमिधंचसव्येनाग्निहोत्रहवणींदेवस्यत्वास॰स्ताभ्यामाददइतिगार्हपत्येप्रतितपतिप्रत्युष्टंरक्षःप्रत्युष्टाअरातयइतित्रिरथकूर्चेस्रुचंनिधा
२३ यजमानमामंत्र्योन्नेष्यामीत्योमुन्नयेतियजमानोनुजानात्यथचतुरःस्रुवानुन्नयतिपूर्णान्वान्चोवाभूरिडाभुवइडास्वरिडाभूर्भुवःस्वरिडेतिस्तान्त्याःस्रु
वंप्रत्यवधायाथैनेसंमृशतिसजूर्देवैःसायंयावभिःसायंयावानोमादेवाःस्वस्तिसंपादयंतुपशुभिरितिसायंसजूर्देवैःप्रातर्यावभिःप्रातर्यावाणोमादेवाः
स्वस्तिसंपादयंतुपशुभिरितिप्रातरत्रैतांसमिधंस्रुवदंडउपसंगृह्यजघनेनगार्हपत्यमुपसादयतिकूर्चेनमईशानायप्रजाःपशवोमेवर्धतामहंयजमानोमा
रिषमितिदशहोत्रोद्धृत्यप्राङ्हरतिभूर्भुवःस्वरुर्वंतरिक्षमन्विह्ययंपथावितोदेवयानोयेनायमृषयःस्वर्गकामास्तेनगच्छामिपरमेव्योमन्यथानहीये
यंस्वःकृतांसकाशादितिजघनेनाहवनीयमुपसादयतिकूर्चेत्रैतांसमिधंमध्यतआहवनीयस्याभ्यादधाति॥ ५ ॥रजतांत्वाग्निज्योतिषंवायुमतीं
स्वर्ग्यांस्वर्गायलोकायरात्रिमक्षितिमिष्टकामुपदधेमृतंप्राणेदधामिप्रजापतिस्त्वासादयत्वितितयादेवतंकरोतितयादेवतयांगिरस्वध्रुवासीदेत्यथस्रु
ददोहसंकरोतितास्यस्रुद्दोहसःसोमंश्रीणंतिपृश्नयः॥जन्मन्देवानांविशस्त्रिष्वारोचनेदिवइतिसायमथप्रातर्हरिणींत्वासूर्यज्योतिषंवायुमतींस्व
र्ग्यांस्वर्गायलोकायाहरक्षितिमिष्टकामुपदधेमृतमपानेदधामिप्रजापतिस्त्वासादयत्वितितयादेवतंकृत्वास्रुद्दोहसंकरोतितस्यामादीप्तायांप्रतिमुखं २३
जुहोत्यग्निर्ज्योतिर्ज्योतिरग्निःस्वाहेतिसायंसूर्योज्योतिर्ज्योतिःसूर्यःस्वाहेतिप्रातरितितुनसंसृष्टमग्निर्ज्योतिर्ज्योतिःसूर्यःस्वाहेतिसायंसूर्योज्योतिर्ज्योति
रग्निःस्वाहेतिप्रातरथसकृदभिवाल्यकूर्चेस्रुचंनिधायदक्षिणाद्धार्हपत्यंप्रतीक्षतउपप्रेतसंगच्छध्वंमाभागिनोभागधेयंप्रमायि॥सप्तऋषीणांसुकृतांयत्रलो

कास्तत्रेमंयज्ञंयजमानंचधत्तेत्यतिहायपूर्वामाहुतिमुत्तरांभूयःसमिध्येवजुहोतिप्रजापतयेस्वाहेतिमनसाऽथत्रिरतिवाल्यकूर्चेस्रुचंनिधायावाचीनम
वमृज्यप्रतीचीनंपाणिनौषधीर्लेपंनिमार्ष्ट्योषधीभ्यस्त्वौषधीर्जिन्वेत्यवमेवद्वितीयमवमृज्यौषधीष्वेवनिमार्ष्टिदक्षिणतःप्राचीनावीतीपितृभ्यस्त्वा
पितॄन्जिन्वेतिसायमथप्रातरूर्ध्वमुन्मृज्यप्राचीनंतेनपाणिनौषधीर्लेपमुन्मार्ष्ट्योषधीभ्यस्त्वौषधीर्जिन्वेत्येवमेवद्वितीयमवमृज्यौषधीष्वेवनिमार्ष्टिदक्षि
णतःप्राचीनावीतीपितृभ्यस्त्वापितॄन्जिन्वेत्यथापउपस्पृश्यद्विरंगुल्याप्राश्नातिप्रजाज्योतिरित्यथोदङ्पर्यावृत्यप्राचीनदंड्यास्रुचाभक्षयतीदंहविः॥ ६ ॥
इदंहविःप्रजननंमेअस्तुदशवीरंसर्वगणंस्वस्तये॥आत्मसनिप्रजासनिपशुसन्यभयसनिलोकसनिवृष्टिसनि॥अग्निःप्रजांबहुलांमेकरोत्वन्नंपयोरे
तोअस्मासुधत्तरायस्पोषमिषमूर्जमस्मासुदीधरत्स्वाहेतिसायंसूर्यःप्रजांबहुलांमेकरोत्वितिप्रातर्निर्णिज्यस्रुचंनिष्टप्याद्भिःपूरयित्वोदगुद्दिशतिसप्तऋषीन्प्री
णीहिसप्तर्षीन्जिन्वसप्तर्षिभ्यःस्वाहेतिसप्तर्षीनेवप्रीणातीतिब्राह्मणमथजघनेनगार्हपत्यमपोनिनयतीदमहमग्नौवैश्वानरेमृतंजुहोमिस्वाहेत्यक्षिताम
क्षिताहुतिंजुहोमिस्वाहेत्यंतर्वेदिनिनयतिहुत्वोपसमिंधेब्रह्मवर्चसस्यसमिध्याअपोनिनयत्यवभृथस्यैवरूपमकरितिब्राह्मणं॥ ७ ॥द्वितीयः॥अथसा
यंहुतेग्निहोत्रेयज्ञोपवीत्यपआचम्ययजमानायतनेतिष्ठन्नाहवनीयमुपतिष्ठतउपप्रयंतोअध्वरमितिषड्भिरनुष्टुभंसंषड्भिरेवोत्तराभिराग्निपावमा
नीभिराहवनीयमेवोपतिष्ठतेग्नआयूंषिपवसेग्नेपवस्वाग्नेपावकसनःपावकाग्निःशुचिव्रततमउदग्नेशुचयस्तवेत्यथाहवनीयमेवोपतिष्ठतआयुर्दा
अग्नेस्यायुर्मेदेहिवर्चोदाअग्नेसिवर्चोमेदेहितनूपाअग्नेसितनुवंमेपाह्यग्नेयन्मेतनुवाऊनंतन्मआपृणेत्यथरात्रिमुपतिष्ठतेचित्रावसोस्वस्तितेपारमशीय

Indira Gandhi National
Centre for the Arts

बौ०कृ०सू० २४ त्यथाहवनीयंसमिधमादधातीधानास्त्वाशतंहिमाद्युमंतःसमिधीमहिवयस्वंतोवयस्कृतंयशस्वंतोयशस्कृतंसुवीरासोअदाभ्यं॥अग्नेसपत्नदंभनं
६६ दीदयच्छतं हिमा द्वायू राधांसीत्संपृञ्चानावसंपृञ्चानौ तन्व इति समानं कर्मा नायिपयात्र चर्य्य वपाश्रपणी अनुप्रहृत्य यजमुत्क्रम्य चात्वालमार्ज
यतेऽथ यजमानमुत्करे स्फ्यस्य विघनानुप्रस्थापयति ॥ ९ ॥ स्फ्यः स्वस्तिर्विघनः स्वस्तिः पर्शुर्वेदिः परशुर्नः स्वस्तिः ॥ यज्ञिया यज्ञं कृत स्थेमास्मिन्यज्ञ उ
पह्वयध्वमुप माद्यावापृथिवी ह्वयेतामुपास्तावः कलशः सोमो अग्निरुप देवा उप यज्ञ उप मा होत्रा उपहवे ह्वयन्तामित्यथ नमोऽग्नये मखघ्ने मखस्य
मा यशोऽर्यादित्याहवनीयमुपतिष्ठते यज्ञीनमो रुद्राय मखघ्ने नमस्कृत्या मा पाहीत्याग्नीध्रं नम इन्द्राय मखघ्न इन्द्रियं मे वीर्यं मा निर्वधीरिति होत्रीय
मथ प्राङावृत्य जपति दृहे स्थः शिथिरे समीची मांहसस्पातं सूर्यो मा देवो दिव्यादंहसस्पातु वायुरन्तरिक्षादग्निः पृथिव्या यमः पितृभ्यः सरस्व
ती मनुष्येभ्य इत्यथ प्रदक्षिणमावृत्य पूर्वे द्वारौ सदसः संमृशति देवी द्वारौ मा मा संताप्तमिति स सदः प्रपद्यते नमः सदसे नमः सदसस्पतये नमः स
खीनां पुरोगाणां चक्षुषे नमो दिवे नमः पृथिव्या इत्यथासनाद्बहिः सदसस्तृणं निरस्यत्यपस्त्रैषधिषव्या दतस्थितान्यस्य सदने सीदयोऽस्मत्पाकं
तर इत्युपविशत्युन्निवत उदुद्वतश्च स्थेषमित्यथेमे समीक्षते पातं मा द्यावापृथिवी अद्याह्न इत्यथ दक्षिणार्धं परेक्षत आगंत पितरः पितृमान्
अहं युष्माभिर्भूयासं सुप्रजसो मया यूयं भूयास्त इत्यथोत्तरार्धं परेक्षत उदक्संस्थता या इति ॥ १० ॥ अथेमावध्वर्यू आहवनीयं प्रभृत्येवमेवाह
वनीयमुपतिष्ठेते एवमेवाग्नीध्रीयमेवं होत्रीयमेवं प्राञ्चावावृत्य जपत एवं प्रदक्षिणमावृत्य पूर्वे द्वारौ सदसः संमृशत एवं सदः प्रपद्येते ए ६६

वमासनाभ्यां बहिः सदसं तृणं निरस्यतो दक्षिणमेवाध्वर्युर्द्वार्बाहुं निःश्रयमाणा उपविशत्युत्तरं प्रतिप्रस्थातेवमिमे समीक्षेते एवं दक्षिणार्धं चो
त्तरार्धं च परेक्षेते उदक्संस्थता या इत्यथैवमेव षट्कर्तार आहवनीयं प्रभृत्येवमेवाहवनीयमुपतिष्ठन्त एवमेवाग्नीध्रीयं तमुत्तरेण पर्यैत्येवं होत्रीय
मेवं प्राञ्च आवृत्य जपन्त्येवं प्रदक्षिणमावृत्य पूर्वे द्वारौ सदसः संमृशन्त्येवं सदः प्रपद्यन्तेऽग्रेण धिष्ण्याननुत्तरेणाच्छावाकस्य च धिष्ण्यं परीत्यैवमास
नेभ्यो बहिः सदसं तृणानि निरस्यन्त्येवं स्वं स्वमेव धिष्ण्यमनूपविशन्त्येवमिमे समीक्षन्त एवं दक्षिणार्धं चोत्तरार्धं च परेक्षन्त उदक्संस्थता या इत्य
थेमे सर्व उद्गातारो ब्रह्मा सदस्य इत्यषट्कर्तार आहवनीयं प्रभृत्येवमेवाहवनीयमुपतिष्ठन्त एवमाग्नीध्रीयं तमुत्तरेण पर्यैत्येवं होत्रीयमेवं प्रा
च आवृत्य जपन्त्येवं प्रदक्षिणमावृत्योत्तरेण सदः परीत्यैवमपरे द्वारौ सदसः संमृशन्त्येवं सदः प्रपद्यन्त एवमासनेभ्यो बहिः सदसं तृणानि निरस्य
न्त्योदुम्बरीमेवोद्गातारः पर्युपविशन्ति दक्षिणत उदङ्मुखो ब्रह्मा च सदस्य इत्युपविशन्त एवमिमे समीक्षन्त एवं दक्षिणार्धं चोत्तरार्धं च परेक्षन्त उदक्
संस्थता या इत्यथैतेषां विसंस्थितसंचरोऽन्तरेण होतुश्च धिष्ण्यं ब्राह्मणाच्छंसिनश्च ये धिष्ण्या अथ धिष्णियवन्तः स्वं स्वमेव धिष्णियमुत्तरेणो
त्तरेण पर्यायन्ति ते संस्थिते सवने यथाप्रसृप्तमेव विनिःसर्पन्ति ॥ ११ ॥ इति तृतीयः ॥ संप्रसृप्तान्विदित्वाध्वर्युः सवनीयान्पुरोडाशानन्यांश्च यथेष आ
ग्नीध्रो जघनेन गार्हपत्यमुपविश्य पात्र्यांपं च धायास्तृणीति मध्यतः पुरोडाशामुपस्तीर्णाभिघारितमुद्वासयति पुरस्ताद्धानादक्षिणतः करम्भपात्रा
स्परिवापमामिक्षामुत्तरतोऽथैनानि संपरिगृह्य पूर्वया द्वारोपनिहृत्यान्तरेण सदः परीत्यान्तरेणाग्नीध्रीयं धिष्ण्यं पर्याहृत्यान्तर्वेद्यासादयत्यथ जु

Indira Gandhi National Centre for the Arts

बौ० क० सू०
६७

हृपयतोरुपस्तरणान आह प्रातः प्रातः सावस्येंद्राय पुरोडाशानामवदीयमानानामनुब्रूहीति द्विः पुरोडाशस्यावद्यति द्विर्धानानां द्विः क
रंभस्य द्विः परिवापस्य द्विरामिक्षाया अभिघारयति प्रत्यनक्त्ययातयाम्नि तिस्विष्टकृते सर्वेषां सकृत्सकृदुत्तरार्धादवद्यति द्विरभिघारयति न
प्रत्यनक्त्युत्क्रम्याश्राव्याह प्रातः प्रातः सावस्येंद्राय पुरोडाशानां प्रस्थितानां प्रेष्येति वषट्कृते जुहोत्यथ समावपमान आहानुब्रूहीत्याश्राव्या
हाग्नये प्रेष्येति वषट्कृत उत्तरार्धपूर्वार्धे तिसायपूर्वाहुतीर्जुहोत्यथ यथारूढं त्याक्रम्य यथायतनं स्रुचौ सादयित्वा पात्र्यामिडां समवधाय प्र
तीचः पुरोडाशान्प्रक्षिणात्यनुदिशेक संयेति पत्रावदंतेति वदंतोऽथ प्राङायत्याहेंद्रवायवइंद्रवायुभ्यामनुब्रूहीति तद्धुत्वा प्रतिप्रस्थातेंद्रवायवस्य प्रति
निग्राह्यं गृह्णाति द्रोणकलशात्परिप्लुतापात्रेणादित्यस्थाल्या औपभृताय पात्र उपयामगृहीतोसि वाक्षसदसि वाक्पाभ्यां त्वा क्रतुपाभ्यामस्य यज्ञ
स्य ध्रुवस्याध्यक्षाभ्यां गृह्णामीति ग्रहावादायापनिष्क्रामत्यपनिष्क्रांतस्यैवाध्वर्युर्ग्रहावादत्त उत्तरतस्तिष्ठंतं प्रतिप्रस्थात्रे प्रतिनिग्राह्यं प्रयच्छ
त्यथैवेभवत्सैंद्रवायवमादायघारमाघारयेदिति स आज्यस्थाल्याः स्रुवेणोपहत्यैंद्रवायवमादायाघारमाघारयत्यध्वरो यज्ञोयमस्तु दे
वा ओषधीभ्यः पशवे नो जनाय विश्वस्मै भूतायाध्वरोसि स पिन्वस्व घृतवद्देव सोम स्वाहेत्यथाश्रावयत्याश्रावयास्तु श्रौषट् वायव इंद्रवायु
भ्यां प्रेष्येति वषट्कृतेध्वर्युः पूर्वो जुहोति द्वितीयवषट्कृते सहोभौ जुहुतो हुत्वा वाचयति यो न इंद्रवायु अभिदासति भ्रातृव्य उत्पिपी
ते शुभस्पती इदमहं तमधरं पादयामि यथेंद्राहमुत्तमश्चेतयानीत्यथ प्रतिप्रस्थाताध्वर्योः पात्रे ग्रहस्य संस्रावमवनयत्युभयोरर्धम

६७

ध्वर्युः प्रतिप्रस्थातुः पात्रेवनयति तं प्रतिप्रस्थातादित्यस्थाल्यामवनयति देवेभ्यस्त्वेत्यथाध्वर्युः प्रदक्षिणमावृत्य प्राङुद्द्रुत्य होत्रे पात्रं प्रदाय
प्राङायत्याह मित्रावरुणाभ्यामनुब्रूहीति तद्धुत्वा प्रतिप्रस्थाता मैत्रावरुणस्य प्रतिनिग्राह्यं गृह्णाति द्रोणकलशात्परिप्लुतापात्रेणादित्य
स्थाल्या औपभृताय पात्र उपयामगृहीतोस्यृतसदसि चक्षुष्पाभ्यां त्वा क्रतुपाभ्यामस्य यज्ञस्य ध्रुवस्याध्यक्षाभ्यां गृह्णामीति ग्रहावादायाप
निष्क्रामत्यपनिष्क्रांतस्यैवाध्वर्युर्ग्रहावादत्त उत्तरतस्तिष्ठते प्रतिप्रस्थात्रे प्रतिनिग्राह्यं प्रयच्छत्यथाश्रावयत्याश्रावयास्तु श्रौषण्मित्रावरुणाभ्यां
प्रेष्येति वषट्कृते सहोभौ जुहुतो हुत्वा वाचयति यो नो मित्रावरुणावभिदासति भ्रातृव्य उत्पिपीते शुभस्पती इदमहं तमधरं पादयामि य
थेंद्राहमुत्तमश्चेतयानीत्यथ प्रतिप्रस्थाताध्वर्योः पात्रे ग्रहस्य संस्रावमवनयत्युभयोरर्धमध्वर्युः प्रतिप्रस्थातुः पात्रेवनयति तं प्रतिप्रस्थाता
दित्यस्थाल्यामवनयति विश्वेभ्यो देवेभ्यस्त्वेत्यथाध्वर्युः प्रदक्षिणमावृत्य प्राङुद्द्रुत्य होत्रे पात्रं प्रदाय प्राङायत्याहाश्विभ्यामनुब्रूहीति तद्धुत्वा
प्रतिप्रस्थाताश्विनस्य प्रतिनिग्राह्यं गृह्णाति द्रोणकलशात्परिप्लुतापात्रेणादित्यस्थाल्या औपभृताय पात्र उपयामगृहीतोसि श्रुतसदसि श्रोत्र
पाभ्यामस्य यज्ञस्य ध्रुवस्याध्यक्षाभ्यां गृह्णामीति ग्रहावादायापनिष्क्रामत्यपनिष्क्रांतस्यैवाध्वर्युर्ग्रहावादत्त उत्तरतस्तिष्ठते प्रतिप्रस्थात्रे प्र
तिनिग्राह्यं प्रयच्छत्यथाश्रावयत्याश्रावयास्तु श्रौषडश्विभ्यां प्रेष्येति वषट्कृते सहोभौ जुहुतो हुत्वा वाचयति यो नो अश्विनावभिदासति भ्रातृ
व्य उत्पिपीते शुभस्पती इदमहं तमधरं पादयामि यथेंद्राहमुत्तमश्चेतयानीत्यथ प्रतिप्रस्थाताध्वर्योः पात्रे ग्रहस्य संस्रावमवनयत्युभयोरर्धम

Indira Gandhi National Centre for the Arts

मध्वर्युः प्रतिप्रस्थातुर्मात्रेवनयति तं प्रतिप्रस्थातादित्यस्थाल्यामवनयति विश्वेभ्यस्त्वा देवेभ्य इति ॥ १२ ॥ स पयुद्दे ते: संस्रावैरुपर्यधीस्थाली
भवत्येतेनैनां पात्रेणापिदधाति यद्युवैनोपर्यधो भवति द्रोणकलशादेवैनामुपर्यधीस्त्वे तेनैव पात्रेणापिदधाति विष्णुरुरुक्रमैष ते सोमस्तं रक्ष
स्व तं ते दुश्चक्षा मावख्यदित्यथाध्वर्युः प्रदक्षिणमावृत्य प्रत्यङ् द्रुत्य होत्रे पात्रं प्रदाय । ओ श्रावयेत्याह हो नीयमानेभ्योनुब्रूहि होतुश्चमसमनून्नयध्व
मुभयतः शुक्रा त्कुरुध्वमच्छावाकस्य चमसाध्वर्यो मा तु त्वमुन्नेष्ठाः प्रतिप्रस्थातश्चतुर्भिर्मा शाकलैः प्रोक्षिता प्रोक्षितैः प्रस्फपलैबस्वे तियथासंप्रे
षं ते कुर्वन्ति द्रोणकलशादेव प्रथममुन्नयंत्यथ पूतभृतोथ द्रोणकलशात्तउभयतः शुक्रा होतृचमसमेव प्रथममुन्नयति यथोपपादमितरांस्स
मुन्नीयोत्तरवेद्यां संसादयंत्यथ प्रतिप्रस्थाता चतुर्णां शाकलानां द्वौ प्रोक्षति द्वाव प्रोक्षितौ भवतः प्रोक्षिताभ्यामपिधायाप्रोक्षिताभ्यामुपयच्छ
तः शुक्रमेवाध्वर्युरादत्ते मंथिनं प्रतिप्रस्थातायद्वावादायोपनिष्क्रामतो दक्षिणमेवाध्वर्युर्द्वार्बाहुं निश्रयमाण उपनिष्क्रामत्युत्तरं प्रतिप्रस्थाता तौ
जघनेनोत्तरवेदिं ग्रहौ संधत्त आयुः संधत्तं तन्मे जिन्वतं प्राणं संधत्तं तन्मे जिन्वतमपानं संधत्तं तं मे जिन्वतं व्यानं संधत्तं तं मे जिन्वतं चक्षुः सं
धत्तं तन्मे जिन्वतं श्रोत्रं संधत्तं तन्मे जिन्वतमिति षड्भिः संधाभिः संधाय व्युत्क्रामतः स्कन्नो सि जनधा देवास्त्वा शुक्रपाः प्रणयंतु सुवीराः प्रजाः प्रज
नयन्परीहि शुक्रः शुक्रशोचिषेत्यध्वर्युर्दक्षिणेनोत्तरवेदिं परिक्रामति स्कन्नो सि जनधा देवास्त्वा मंथिपाः प्रणयंतु स्फ प्रजाः प्रजाः प्रजनयन्परीहि
मंथी मंथिशोचिषेति प्रतिप्रस्थातोत्तरेणोत्तरवेदिं परिक्रामति तौ पुरस्तात्प्रत्यंचावुत्तरवेदिमभिद्रवत इंद्रेण सयुजो वयं सासह्याम पृतन्यतः ॥

घ्नंतो वृत्राण्यप्रति ॥ यत्ते अग्ने तेजस्तेनाहं तेजस्वी भूयासं यत्ते अग्ने वर्चस्तेनाहं वर्चस्वी भूयासं यत्ते अग्ने हरस्तेनाहं हरस्वी भूयासमित्यथांतरेण
यूपं चाहवनीयं च ग्रहौ संधत्त आयुस्थ आयुर्मे धत्तमायुर्यज्ञाय धत्तमायुर्यज्ञपतये धत्तं प्राणस्थः प्राणं मे धत्तं प्राणं यज्ञाय धत्तं प्राणं यज्ञपतये ध
त्तमपानस्थो पानं मे धत्तमपानं यज्ञाय धत्तमपानं यज्ञपतये धत्तं व्यानस्थो व्यानं मे धत्तं व्यानं यज्ञाय धत्तं व्यानं यज्ञपतये धत्तं चक्षुस्थश्चक्षुर्मे धत्तं
चक्षुर्यज्ञाय धत्तं चक्षुर्यज्ञपतये धत्तं श्रोत्रं स्थः श्रोत्रं मे धत्तं श्रोत्रं यज्ञपतये धत्तमिति षड्भिः संधाभिः संधाय व्युत्क्रामतस्तो देवो शुक्रामंथिनौ
कल्पयतं दैवीर्विशः कल्पयतं मानुषीरिषमूर्जमस्मासु धत्तं प्राणान्पशुषु प्रजां मयि च यजमाने चेत्यथाप्रोक्षितौ शाकलौ बहिर्वेदि निरस्यतो नि
रस्तः शंडः सहामुनेत्यध्वर्युर्यं यजमानो द्वेष्टि तं मनसा ध्यायति निरस्तो मर्कः सहामुनेति प्रतिप्रस्थाता यं यजमानो द्वेष्टि तं मनसा ध्यायत्यथाप
उपस्पृश्य प्रोक्षितावभ्याधत्तः शुक्रेषांत समित्तया समिध्यस्व स्वाहेत्यध्वर्युर्मंथिन्नेषांत समित्तया समिध्यस्व स्वाहेति प्रतिप्रस्थाता ॥ १३ ॥ एत
स्मिन्काले चमसाध्वर्यवश्चमसानुपोद्यच्छंते थाध्वर्युः पुरस्तात्प्रत्यङ् तिष्ठन्नाश्रावयत्याश्रावयास्तु श्रौषट् प्रातः प्रातः सावस्य शुक्रवतो मंथिवतो
मधुश्चुत इंद्राय सोमान्प्रस्थितान्प्रेष्येति वषट्कृते संहामो जुहुतः स प्रथमः संकृतिर्विश्वकर्मा स प्रथमो मित्रो वरुणो अग्निः ॥ स प्रथमो बृहस्पति
श्चिकित्वांस्तस्मा इंद्राय सुतमाजुहोमि स्वाहेति वषट्कृतानुवषट्कृते हि जुह्वतस्तथैव हि हिं: सर्वांश्चमसाञ्जुह्वत्यथ संप्रेषमाह प्रैतु होतुश्च
मसः प्र ब्रह्मणः प्रोद्गातुः प्र यजमानस्य प्र सदस्यस्य प्र होत्रकाणां चमसाध्वर्यवः सकृत्सकृद्द्रोणकलशाद्भ्युन्नीयोपावर्तध्वं होतुश्चमसाध्व

Indira Gandhi National
Centre for the Arts

बौ० क० सू०
६९

यं वु परमे हि प्रतिप्रस्थातरुत्तरार्धे आहवनीयस्य मंथिनः मः स्त्रावं जुहुधीति यथा संप्रेषितं कुर्वन्नथ प्रदक्षिणमावृत्य होतृचमसं सग्रहस्य संस्त्रावम्
वनयति कृतं वाकृतं वन याम्यः जेस्वंतं देवेभ्यो मधुमंतं मनुष्येभ्य इति यात्तूष्णीं वाथ प्रतिप्रस्थातोत्तरार्धे आहवनीयस्य मंथिनः संस्त्रावं जुहोत्येष ते रुद्रभा न:२
गो यं निरयाचथास्तं जुषस्व विदेर्गौपत्यं रायस्पोषं सुवीर्यं संवत्सरीणां स्वस्तिं स्वाहेत्यथापउपस्थश्य शुक्रपात्रं च मंथिपात्रं च खरे यथायतनं सा
दयति यं येतमहर्त्विजो चमसा अथैतं होत्रकाणां चमसाध्वर्यवः सरुतसरुत द्रोणकलशादायुन्नीयापावर्तते तेषां मैत्रावरुणचमसमादायाश्राव्याह प्र
शास्तर्यजेति वषट्कृतानुवषट्कृते हि जुहोति ब्रह्मन्नुपजपात यजनेष्टये जाग्नीध्र यजेति पंच होत्राः संयाज्य प्रदक्षिणमावृत्य प्रत्यङ्ङुद्रुत्याग्रेण होता
रमुपविशत्यस्य याउग्नीदिति सभद्रसमकरित्याह होता यानः सोमं राजानं पाययिष्यतीत्यथ होतारं त्वत्तं ऐंद्रवायवपात्रमात्तमेवाध्वर्युरन्वारभतेऽन्वारब्धे
ध्वर्यौ होतोपहवमिष्ट्वा भक्षयति यथा संवरतथान्वारब्धे होतर्यध्वर्युरुपहवमिष्ट्वा भक्षयति मयि वसुः पुरोवसुर्वाक्पा वाचं मे पाहीत्यथ होता भक्षयत्य
थाध्वर्युरथैनं श्रोत्रेनुषजति तस्योतायथातनं सादयत्यथ होतारं त्वत्तं मैत्रावरुणपात्रमात्तमेवाध्वर्युरन्वारभतेऽन्वारब्धेऽध्वर्यौ होतोपहवमिष्ट्वा भक्षय
ति यथासंवरतथान्वारब्धे होतर्यध्वर्युपहवमिष्ट्वा भक्षयति मयि वसुर्विदद्वसुश्चक्षुष्पाश्चक्षुर्मे पाहीत्यथैनं श्रोत्रेनुषजति तस्योतायथायतनं सा
दयत्यथ होतारं त्वत्तं आश्विनपात्रमात्तमेवाध्वर्युरन्वारभतेन्वारब्धेऽध्वर्यौ होतोपहवमिष्ट्वा भक्षयति यथा संवरतथान्वारब्धे होतर्यध्वर्युपहवमिष्ट्वा भक्षय ६९
ति मयि वसुः संयद्वसुः श्रोत्रपाः श्रोत्रं मे पाहीति सर्वतः सरिहारमाश्विनं भक्षयतीति ब्राह्मणमथैनं श्रोत्रेनुषजति तस्योतायथायतनं सादयत्यथापउ

पस्थश्य होत्रइडाउपोद्यच्छंतउपहूयमानायामिडायामुपप्रगृह्णंति चमसानुपहूतायामिडायामनाहितमग्नीधे भवत्यथैतानि द्विदेवत्यपात्राण्य
तिरिक्तानि करोति पुरोडाशकलमैंद्रवायवे प्रास्यत्यामिक्षां मैत्रावरुणपात्रे धाना आश्विनपात्रेथैनानि संपरिगृह्य पूर्वया द्वारोपनिर्हृत्यापरया द्वा
रा हविर्धानं प्रपाद्य दक्षिणस्य हविर्धानस्याक्षरस्यांवर्तन्यां सादयति तान्यात्तृतीयसवनात्परिशेरेरथाग्नीध्र आदधाति षडवत्तं प्राश्नंति मार्जयंतइ
डोपहूतां श्चमसान्भक्षयंति भर्क्षैहि माविशेति दीर्घभक्षमनुद्रुत्य वसुमद्गणस्य सोम देव ते मतिविदः प्रातःसवनस्य गायत्रछंदस इंद्रपीतस्य म
धुमत उपहूतस्योपहूतो भक्षयामीति होतृचमसमेवैते त्रयः समुपहूय भक्षयंति यथा चमसं चमसानृत्विजो भक्षयित्वा नाराशंसान्प्रत्यभिमृश्यात आप्याय
यंति चमसानाप्यायस्व समेतु त इति सीदंति नाराशंसा आप्यायिता दक्षिणस्य हविर्धानस्य वालंबमधो धैरेंद्रा यंन्तो ॥ १४ ॥ अथैषोऽच्छावाकोऽग्रे
णसद आस्ते तस्मिन्नहतु पुरोडाशशकलम वरधरा ह्यच्छावाकवदस्व यत्ते वाद्यमिति सय त्राच्छावाकस्याभिजानाति एषो अस्मन् ब्राह्मणान्ब्राह्म
णाह्वयध्वमिति तदाह होतरच्छावाको वा अयमुपहवमिच्छते तमुपहूयस्वेति तमुत्ताह होतोपह्वयते य प्राउपयन्नाह्वान्नीयमानायानुब्रूह्यच्छावाक
स्य चमसाध्वर्यवुन्नयस्वो मयतः शुक्रं कुरुष्वेति स तथा करोत्यथ प्राङुत्याच्छावाकचमसमादायाश्राव्याहाच्छावाक यजेति वषट्कृतानुवषट्कृ
तं हुत्वा हरति भक्षं सयद्यस्मिन्नच्छावाकउपहवमिच्छत उपैवेन ह्वयते नो ह्वेव स भक्षयतः सीदन्त्यस्य नाराशंसा आप्यायितोथाहाच्छावाकसी
दने ष्टः पत्नीमुदानयाग्नीदच्छावाकं मे सन्नं प्रब्रूतादिति सीदत्येषोऽच्छावाक जघनेन खं धिष्ण्यमानयति नेष्टा पत्नीं पन्नेजनी रासयं प्रेसुरे होत्ये

Indira Gandhi National
Centre for the Arts

बौ० क० सूत्र० १० न

तेन निगदेनाथैनां पूर्वया द्वारोपनिष्क्रमय्यापरया द्वारा सदः प्रपाद्य जघनेनाग्नीध्रं धिष्ण्यमसंचरे सामपथे पत्नीजनीः सादयामि वसुभ्यो रुद्रेभ्य आदि
त्येभ्यो विश्वेभ्यो देवेभ्यः पत्नीजनीः सादयामि गज्ञायवः पत्नीजनीः सादयामीत्यथाग्नीध्रः सन्नां छावाकौ छावाकं सन्नमुपपत्नीजनीरसीषदं
दौनित्येतस्मिन्काल आग्नीध्रे यजमानः पुरोडाशानां प्राश्नाति यस्यानास्यासत्नीपत्नी शालेः ॥ १५ ॥ इति चतुर्थः ॥ ४ ॥ अथर्तुपात्रे आददाते दक्षिण
मेवाध्वर्युरुत्तरं प्रतिप्रस्थाताध्वर्युः पूर्वो वायव्येन द्रोणकलशादृतुग्रहानुपयामगृहीतोसि मधवे त्वा जुष्टं गृह्णामीत्यथ प्रतिप्रस्थाता गृह्णात्युपयामगृ
हीतोसि माधवाय त्वा जुष्टं गृह्णामीति ग्रहावादायोपनिष्क्रामतो दक्षिणमेवाध्वर्युर्द्वारबाहुं निश्रयमाण उपनिष्क्रामत्युत्तरं प्रतिप्रस्थाता द्वारबाहुं
निःश्रयमाण उपरमत्यथाध्वर्युराश्रावयत्योश्रावयास्तु श्रौषडृतुनाप्रेष्येति वषट्कृते जुहोति निष्क्रामत्येव प्रतिप्रस्थाता प्रपद्यतेध्वर्युः सगृ
ह्णात्युपयामगृहीतोसि शुक्राय त्वा जुष्टं गृह्णामीत्यथ प्रतिप्रस्थाताश्रावयत्योश्रावयास्तु श्रौषडृतुनाप्रेष्येति वषट्कृते जुहोति निष्क्रामत्येवाध्व
र्युः प्रपद्यते प्रतिप्रस्थाता स गृह्णात्युपयामगृहीतोसि शुचये त्वा जुष्टं गृह्णामीत्यथाध्वर्युराश्रावयत्योश्रावयास्तु श्रौषडृतुनाप्रेष्येति वषट्कृते जु
होति निष्क्रामत्येव प्रतिप्रस्थाता प्रपद्यतेध्वर्युः स गृह्णात्युपयामगृहीतोसि नभाय त्वा जुष्टं गृह्णामीत्यथ प्रतिप्रस्थाताश्रावयत्योश्रावयास्तु श्रौ ७०
षडृतुनाप्रेष्येति वषट्कृते जुहोति निष्क्रामत्येवाध्वर्युः प्रपद्यते प्रतिप्रस्थाता स गृह्णात्युपयामगृहीतोसि नभस्याय त्वा जुष्टं गृह्णामीत्यथाध्वर्युराश्रावयत्यो
श्रावयास्तु श्रौषडृतुनाप्रेष्येति वषट्कृते जुहोति निष्क्रामत्येव प्रतिप्रस्थाता प्रपद्यतेध्वर्युर्विपर्यस्य पात्रं स गृह्णात्युपयामगृहीतोसि इषाय त्वा जुष्टं गृ

ह्णामीत्यथ प्रतिप्रस्थाताश्रावयास्तु श्रौषडृतुनाप्रेष्येति वषट्कृते जुहोति निष्क्रामत्येवाध्वर्युः प्रपद्यते प्रतिप्रस्थाता विपर्यस्य पात्रं स गृह्णात्युप
यामगृहीतोसि ऊर्जाय त्वा जुष्टं गृह्णामीत्यथाध्वर्युराश्रावयत्योश्रावयास्तु श्रौषडृतुभिः प्रेष्येति वषट्कृते जुहोति निष्क्रामत्येव प्रतिप्रस्था
ता प्रपद्यतेध्वर्युः स गृह्णात्युपयामगृहीतोसि सहाय त्वा जुष्टं गृह्णामीत्यथ प्रतिप्रस्थाताश्रावयत्योश्रावयास्तु श्रौषडृतुभिः प्रेष्येति वषट्कृ
ते जुहोति निष्क्रामत्येवाध्वर्युः प्रपद्यते प्रतिप्रस्थाता स गृह्णात्युपयामगृहीतोसि सहस्याय त्वा जुष्टं गृह्णामी। त्यथाध्वर्युराश्रावयत्योश्रावया
स्तु श्रौषडृतुभिः प्रेष्येति वषट्कृते जुहोति निष्क्रामत्येव प्रतिप्रस्थाता प्रपद्यतेध्वर्युर्विपर्यस्य पात्रं स गृह्णात्युपयामगृहीतोसि तपाय त्वा
जुष्टं गृह्णामीत्यथ प्रतिप्रस्थाताश्रावयत्योश्रावयास्तु श्रौषडृतुभिः प्रेष्येति वषट्कृते जुहोति निष्क्रामत्येवाध्वर्युः प्रपद्यते प्रतिप्रस्थाता वि
पर्यस्य पात्रं तमाह प्रतिप्रस्थातरुपेतेन पात्रेण रमेत्यथाध्वर्युराश्रावयत्योश्रावयास्तु श्रौषडृतुनाप्रेष्येत्यध्वर्यू यजतमित्याह प्रशास्ता हो
तरेतद्यजेत्याहाध्वर्यू वषट्कृते जुहोति सात्रेवासीनं प्रतिप्रस्थातारमनुप्रपद्यते प्रतिप्रस्थाता त्र पूर्वो गृह्णात्युपयामगृहीतोसि तपस्याय
त्वा जुष्टं गृह्णामीत्यथाध्वर्युर्गृह्णात्युपयामगृहीतोसि संसर्पोस्यंहस्पत्याय त्वा जुष्टं गृह्णामीति ग्रहावादायोपनिष्क्रामतो दक्षिणमेवा
ध्वर्युर्द्वारबाहुं निःश्रयमाण उपनिष्क्रामत्युत्तरं प्रतिप्रस्थाता त्र प्रतिप्रस्थाताश्रावयत्योश्रावयास्तु श्रौषडृतुनाप्रेष्येति गृहपते यजेत्याह प्र
शास्ता होतरेतद्यजेत्याह गृहपतिर्वषट्कृते सह होभौ जुहुतोथ प्रतिप्रस्थाताध्वर्योः पात्रे ग्रहस्य संस्रावमवनयति तमाह प्रतिप्रस्थातरेतेन

Indira Gandhi National
Centre for the Arts

पात्रेणैंद्राग्नं ग्रहं गृह्णाति तेन प्रतिप्रस्थातैंद्राग्नं ग्रहं गृह्णाति द्रोणकलशात्परिप्लुवा पात्रेणैंद्राग्नी आगतं सुतमित्यनुद्रुत्योपयामगृहीतो
सींद्राग्निभ्यां त्वा जुष्टं गृह्णामीति परिमृज्य सादयत्येष ते योनिरिंद्राग्निभ्यां त्वेत्यथाध्वर्युः प्रदक्षिणमावृत्य प्रत्यङ्ङुदङ्मुखो होत्रे तत्पात्रं संभक्षय
त्यृतुना पीतस्येति होत्रा पोत्रा नेष्ट्राग्नीध्राब्राह्मणाच्छंसिना मैत्रावरुणेनेत्यथ विपर्यस्य पात्रं होत्रैव चतुः संभक्षयन्त्यृतुभिः पीतस्येति होत्रापो
त्रानेष्ट्राच्छावाकेनेत्यथ विपर्यस्यैव पात्रं होत्रैव द्विः संभक्षयन्त्यृतुना पीतस्येति ॥ १८ ॥ अथ होतारं विपृच्छति प्रणवमुपांशु शंसं शंसिष्यसी
क्षिप्राहा उमिति स यथेनं होता प्रत्याहतच्छुचा निगृह्य पात्रं पराङावर्तते उ ओरेव वृरिति यावदेतस्य यजुषः पर्याप्नोति तावज्जपत्यथैनमाह्वय
ते होता प्रत्याह्वयतेऽध्वर्युः शंसं सति प्रतिगृणाति यदुपांशु शंसति तदुपांशु प्रतिगृणाति यदुच्चैः शंसति तदुच्चैः प्रतिगृणाति संततं वा विग्रा
हं वा प्रसिद्धमुक्थं प्रतिगीर्य प्राङ्लोपघ्नत एतमैंद्राग्नं ग्रहमनूद्यच्छंते नाराशंसानथाश्रावयत्योश्रावयास्तुश्रौषडुक्थशायजसोमस्येति वषट्
कृतानुवषट्कृते हुर्जुहोति तथैव द्विर्द्विर्नाराशंसाननुप्रकंपयंत्येतत्पात्रं नाराशंसा अन्वायंत्यनुसवनभक्ष इंद्राग्निभ्यां पीतस्येति होतारं चैवा
ध्वर्युश्चैतत्पात्रं संभक्षयतो नराशंसपीतेन नाराशंसान्नराशंसपीतस्य सोमस्य देव ते मतिविदः प्रातः सवनस्य गायत्रछंदसः पितृपीतस्य मधु
मत उपहूतस्योपहूतो भक्षयामीति होतृचमसं वै तत्त्रयः समुपहूय भक्षयंति यथाचमसं चमसानृत्विग्मिंद्रयाऽऽत्मानं प्रत्यभिमृशंत आप्यायंति
चमसानाप्यायस्व समेतु त इति सीदंति नाराशंसा आप्यायिता दक्षिणस्य हविर्धानस्याधोऽक्षमधोऽधो वैश्वदेवायाथ प्राङ्लोपशुक्रपात्रमादा



नआहोन्नेतर्यदेमं वैश्वदेवं ग्रहं गृह्णाम्यथांदच्वं राजानं पूतभृतमभिसंपवयताद्दशाभिर्द्रोणकलशं मध्यान्युन्नताहिति स तथा करोति स
शुक्रपात्रेणा वैश्वदेवं कलशाद्गृह्णात्योमासश्चर्षणीधृत इत्यनुद्रुत्योपयामगृहीतोसि विश्वेभ्यस्त्वा देवेभ्यो जुष्टं गृह्णामीति परिमृज्य साद
यत्येष ते योनिर्विश्वेभ्यस्त्वा देवेभ्य इत्यथाप उपस्पृश्य बर्हिषी आदाय वाचं यमः प्रस्पर्द्धुत्वा स्तोत्रमुपाकरोति स्तुवंत वैश्वदेवाय होत्र एषोत्त
मेति प्राङु होतुः ५ कालात्पराङावर्ततेऽध्वर्युरथैनमाह्वयते होता प्रत्याह्वयतेऽध्वर्युः शंसं सति प्रतिगृणाति प्रसिद्धमुक्थं प्रतिगीर्य प्राङ्लोपघ
च्छत एतं वैश्वदेवं ग्रहमनूद्यच्छंते नाराशंसानथाश्रावयत्योश्रावयास्तुश्रौषडुक्थशायजसोमस्येति वषट्कृतानुवषट्कृते हुर्जुहोति तथै
व द्विर्द्विर्नाराशंसाननुप्रकंपयंत्येतत्पात्रं नाराशंसा अन्वायंत्यनुसवनभक्षो विश्वैर्देवैः पीतस्येति होतारं चैवाध्वर्युश्चैतत्पात्रं संभक्षयतो नराशं
सपीतेन नाराशंसान्नराशंसपीतस्य सोमस्य देव ते मतिविदः प्रातः सवनस्य गायत्रछंदसः पितृपीतस्य मधुमत उपहूतस्योपहूतो भक्षयामी
ति होतृचमसं मैवं तत्त्रयः समुपहूय भक्षयंति यथाचमसं चमसानृत्विग्मिंद्रयाऽऽत्मानं प्रत्यभिमृशंति नाप्याययंति चमसान्सर्वभक्षा मार्जयंते तथा
हं प्रतिप्रस्थातरि मे चतुर्पात्रे एतच्च शुक्रपात्रं मार्जालीये मार्जयित्वा पात्रेष्वपि सृजेति स तथा करोत्यथ प्राङुन्नयन्नाह ॥ १७ ॥ मित्रावरुणस्य च
मसमनून्नयध्वमुन्नेतः सोमं प्रभावयेति मैत्रावरुणचमसमेव प्रथममुन्नयंति यथोपपादमितरान्त्समुन्नीयोत्तरवेद्यां संसादयत्यथादत्त उ
क्थ्यस्थाल्यां भवत्युपयामगृहीतोसि देवेभ्यस्त्वा देवायुवमुक्थेभ्य उक्थायुवं यज्ञस्यायुषे मित्रावरुणाभ्यां त्वा जुष्टं गृह्णामीति पुनर्हविरसीत्य

Indira Gandhi National
Centre for the Arts

क्थ्यस्थालीं प्रत्यभिमन्त्रयति परिमृज्य सादयत्येष ते योनिर्मित्रावरुणाभ्यां त्वेत्यथाप उपस्पृश्य बर्हिषी आदाय वाचंयमः प्रसृप्य हुत्वा स्तोत्रमुपा
करोति स्तुवते मैत्रावरुणायैषो न्नमेति प्राङ्मैत्रावरुणस्य काकास्पराङावर्ततेऽध्वर्युरभ्येति नमाह्वयते मैत्रावरुणः प्रत्याह्वयतेऽध्वर्युः शꣳसति प्र
तिगृणाति प्रसिद्धमुक्थं प्रतिगीर्य प्राङेत्याच्छत एतं ग्रहमनूच्छंते चमसानथाश्रावयत्याश्रावयाश्रौषडुक्थशायजसोमानामिति वषट्
कृतानुवषट्कृते हुत्वा जुहोति तथैव द्विः सर्वाꣳश्चमसानूर्ध्वाज्जङ्घ्वलयथ प्रदक्षिणमावृत्य मैत्रावरुणस्य चमसे ग्रहस्य संस्रावमवनयति कृतं त्वाकृ
तमवनयाम्यूर्जस्वन्तं देवेभ्यो मधुमन्तं मनुष्येभ्य इति वातूष्णीं वा त्रेधैवैतस्यात्रमुपनिधाय भक्षैः प्रत्यञ्च आद्रवन्त्यनुसवनभक्षो मित्रावरुणाभ्यां पीत
स्येति मैत्रावरुणश्चमसमेवैते त्रयः समुपहूय भक्षयन्ति यथा चमसं चमसान्हिन्वमद्यात्मानं प्रत्यभिमन्त्र्यन्ते नाप्यायन्ति चमसान्त्सर्वभक्षा मा
र्जयन्ते तथा ह प्रतिप्रस्थाता ग्रहं होतेति प्रचरति ततश्च्युत्वा प्रतिप्रस्थाता प्राङनयन्नाह ॥ १८ ॥ ब्राह्मणाच्छंसिनश्चमसमन्नयध्वमुन्नेतः सोमं प्रभावये
ति ब्राह्मणाच्छंसिनश्चमसमेव प्रथममुन्नयति यथोपपादमितरान्त्समुन्नीयोत्तरवेद्यां संसादयन्त्यथाद्य उक्थ्यस्थाल्या औपयायं पात्रं तस्मि
न्नेतस्पराजार्धमेकां गृह्णाति य उक्थ्यस्थाल्यां भवत्युपयामगृहीतोसि देवेभ्यस्त्वा देवायुवमुक्थेभ्य उक्थायुवं यज्ञस्यायुषद्वृन्द्राय त्वा जुष्टं गृह्णा
मीति पुनर्हविरसीत्युक्थ्यस्थालीं प्रत्यभिमन्त्रयति परिमृज्य सादयत्येष ते योनिरिन्द्राय त्वेत्यथाप उपस्पृश्य बर्हिषी आदाय वाचंयमः प्रसृप्य हुत्वा स्तो ७२
त्रमुपाकरोति स्तुवते ब्राह्मणाच्छंसिन एषो न्नमेति प्राङ्ब्राह्मणाच्छंसिनः काकास्पराङावर्तते प्रतिप्रस्थाताभ्येनमाह्वयते ब्राह्मणाच्छंसी प्रत्याह्वयते

प्रतिप्रस्थाता शꣳसति प्रतिगृणाति प्रसिद्धमुक्थं प्रतिगीर्य प्राङेत्याच्छत एतं ग्रहमनूच्छंते चमसानथाश्रावयास्त्वाश्रौषडुक्थशायजसो
मानामिति वषट्कृतानुवषट्कृते हुत्वा जुहोति तथैव द्विर्द्विः सर्वाꣳश्चमसानूर्ध्वाज्जङ्घ्वलयथ प्रदक्षिणमावृत्य ब्राह्मणाच्छंसिनश्चमसे ग्रहस्य संस्रा
वमवनयति कृतं त्वाकृतमवनयाम्यूर्जस्वन्तं देवेभ्यो मधुमन्तं मनुष्येभ्य इति वातूष्णीं वा त्रेधैवैतस्यात्रमुपनिधाय भक्षैः प्रत्यञ्च आद्रवन्त्यनुसवनभक्ष
इन्द्रेण पीतस्येति ब्राह्मणाच्छंसिनश्चमसमेवैते त्रयः समुपहूय भक्षयन्ति यथा चमसं चमसान्हिन्वमद्यात्मानं प्रत्यभिमन्त्र्यन्ते नाप्यायन्ति च
मसान्त्सर्वभक्षा मार्जयन्ते तथ प्राङनयन्नाह ॥ १९ ॥ अच्छावाकस्य चमसमन्नयध्वमुन्नेतः सर्वं एव राजानमुन्नयमातिरीरिचः प्रतिप्रस्था
तः रूपेतेन ग्रहेणारमेहि यजमानेति पूर्वया द्वारा हविर्धानं प्रपाद्याथैतच्चर्मफलकयोः प्राचीनग्रीवमुत्तरलोमोपस्तृणाति यज्ञप्रतितिष्ठेति वातू
ष्णीं वा तस्मिन्त्संमुखान्ग्राव्णः कृत्वा दक्षिणस्य हविर्धानस्यान्तरेणेषे राजानमुपावहरति हर्देस्त्वा मनसे त्वा सोमराजन्नेस्व वरोहेति द्वाभ्याम
थैनमुद्धृत्य प्राङुत्तस्मिꣳस्तच्चेष्टन्ति यत्ते विदुरयो दुह्नाधवनीयमर्धं वसतीवरीणामवनयत्यर्धमेकधनानां पुरोक्षं वसतीवरीः सादयति पश्चा
द्दक्षमेकधनानच्छावाकचमसमेव प्रथममुन्नयति यथोपपादमितरान्त्सर्वं एव राजानं समुन्नीयोत्तरवेद्यां संसादयन्त्यथाद्य उक्थ्यस्था
ल्या औपयायं पात्रं तस्मिन्नेतꣳ सर्वं एव राजानं गृह्णाति य उक्थ्यस्थाल्यां भवत्युपयामगृहीतोसि देवेभ्यस्त्वा देवायुवमुक्थेभ्य उक्थायुवं य
ज्ञस्यायुषद्वृन्द्राग्निभ्यां त्वा जुष्टं गृह्णामीति नात्र पुनर्हविरसीत्युक्थ्यस्थालीं प्रत्यभिमन्त्रयति दत्ताभिरेवैनां मृद्वान्युज्ज्वति परिमृज्य सादयत्ये

Indira Gandhi National Centre for the Arts

बौ० क० सू०
७३

पतेयोनिरिंद्राग्निभ्यांत्वेत्यथापउपस्थश्यवर्हिषी आदायवाचंयमः प्रत्यङ् द्रुत्वास्तोत्रमुपाकरोतिस्तुवतेछावाकोयेषोत्तमेतिप्राकुरछा
वाकस्यकालात्सराउावर्ततेप्रतिप्रस्थाताभ्येनमाह्वयतेछावाकःप्रत्याह्वयतेप्रतिप्रस्थातात्राःसातिप्रतिगण्यालिप्रसिद्धमुक्थंप्रतिगीर्यप्रा
उेत्याघछतएतंग्रहमनूयौच्छंतेचमसानथाश्रावयत्योश्रावयास्त्वश्रौषडुक्थज्ञायजसोमानामितिवषट्कृतानुवषट्कृतेह्विंकृत्सेतित
थैवह्निर्हिःसर्वांश्चमसानूकल्पयत्रदक्षिणामावृत्याछावाकस्यचमसेग्रहस्यसंस्त्रावसवनपतिकृतंत्वाकृतेवनयाम्यूर्जेस्वंतमनुष्येभ्य
इतिवात्रूहमीवात्रैवैतत्यात्रमुपनिधायभक्षैःप्रसंचआद्रवंत्यनुसवनभक्षइंद्राग्निभ्यांपीतस्येत्यछावाकचमसमेवैतेत्रयःसमुपहूयभयं
यथाचमसंचमसानूह्निन्वमइत्यात्मानंप्रत्यभिमन्त्रतेनाप्यायंतिचमसानुत्सर्वभक्षामार्जयंतेथोक्थज्ञाइत्याह्लप्रातःसवनंप्रतिगीर्यप्र
त्रास्तःप्रसर्पतिसर्पतेत्याहप्रशास्तासंतिष्ठंतेप्रातःसवनं॥ २०॥ इतिपंचमः॥ ॥इतिबौधायनकल्पसूत्रेऽष्टमःप्रश्नः॥ ८॥ ॥प्रसर्पति
माध्यंदिनायसवनायदेवीद्वाराविल्यतपूर्वार्धेनसंप्रसृप्तान्विदित्वाध्वर्युःप्राउायनूनानाभिषोतारएतद्व्यतग्रावस्तुतमेह्वियजमानेति
पूर्वयाद्वाराहविर्धानंप्रपाद्यहोतृचमसंवसतेवरीभ्यांध्यर्पानिःपिच्यतास्तथैवनिग्राभ्यास्तयजमानंवाचयतितास्तथैवयजमाना
यसंप्रदायग्रावाणमादत्तेन्यमुपांशुसवनात्ततथैवप्रांचंप्रश्रित्यावित्रस्यराजानंग्रावाणमभिमिमीतइंद्रायत्वेंद्रायत्वेतिपंचकृत्वोयजु
षापंचकृत्वस्तूष्णींदशकृत्वोभिमानःसर्वत्राएवराजानंमिमीतेह्निरश्युक्थ्यग्रावस्तुतउष्णीषंप्रयछत्यह्निरंवाभ्युक्ष्याध्वर्योरावसथं ७३

वासोहरंतितथामितंराजानंहोतृचमसीयाभिरुपसृजतितथासंप्रयोतितथातिरश्चर्मन्तकके अभिमन्त्रयतितथादसीवाचयतिनात्रांश्व
न्सचतेयोपर्वतएवाभिषुण्वंतीहा३उहा३उहा३इतितदेवसह्विनयतीहइहा३इहा३इहा३इहइहा३इत्यथसंभरणीयेनिष्पीडयंतीहा३
इहा३उहा३इत्यथैनंसंभृतंसंभरण्यासंभृत्यानेत्रउत्प्रयछतितमुन्नेताधवनीयेवनयत्येवमेवद्वीयेतीपर्यायःसंतिष्ठतएवंतृतीयस्त
तीयस्यततीयेहरुपयंतिहूहूहूहूदिश्यजीषमंततोस्वापवित्रेणापरिवेष्यान्नेत्रउत्प्रयछतितदुन्नेताधवनीयविक्षास्यप्रपीउय
दक्षिणस्यहविर्धानस्यांतरेणपेउपावहृत्यचर्मणिनिदधातितस्मिंस्तथैवसंमुखान्ग्राव्णःकृत्वाचतुर्थेतहचीषंग्रावमुखेभ्योव्यपोह्यति
तथाज्ञातावाप्रस्तोतावादक्षिणस्यहविर्धानस्यपश्चादक्षमुपसृप्यप्रांचंग्रावस्तद्रोणाकलशमभिगृह्णातितस्मिंस्तथैवोदीचीनदशंदशापप
वित्रंवितन्वंतिप्रसिद्धंशुक्रामंथिनोग्रहौगृह्णात्यथर्तुपात्राभ्यांद्वौमरुत्वतीयोग्रहौगृह्णाति॥ १॥ मेरुत्वंतंवृषभंवावृधानमिंद्रमरुत्वहेडूपा
ह्निसोमंमितिद्वाभ्यामथापरिघ्रादाग्रयणमानीयाधस्तादुपगृह्णातितंतथैवत्रिरभिह्निंकृत्यपरिमृज्यसादयतितथोक्थ्यंगृह्णात्युक्थ्येन
राजानंपरिदधातितथापर्यधेद्रोणाकलशापरिप्लुपात्रंप्रास्यतथोपर्यधेद्रोणाकलशंपयसासक्तुभिर्हिरण्येनचश्रीत्वाद्रप्सानुमंत्रयते
द्रप्सश्चस्कंदयस्तेद्रप्सोयोद्रप्सोयस्तेद्रप्सइतितथोन्नेतारमाहारिक्तंपूतभृतंकुरुपवमानस्यग्रहानग्रहीष्यामीतितथारिक्तंपूतभृति
पवमानस्यग्रहानगृह्णात्यपयामगृहीतोसीन्द्रायत्वेतिद्रोणाकलशमभिमन्त्रयतीन्द्रायत्वेत्याधवनीयमिन्द्रायत्वेतिपूतभृतमथोन्नेतारि

Indira Gandhi National
Centre for the Arts

त्याहप्रोच्चैः राजानं स्तभत्तमभिसंपवयतादृत्ताभिराधावनीयंमद्धान्युक्तताविति सतथा करोति तथापउपस्थ्य बर्हिषी आदायोपनिः सर्पतितिपुतथै
वममन्वारब्धंप्वाहवनीयस्कवाकुर्तिजकहोतिविश्वेदेवामरुतइंद्रो अस्मानस्मिंद्वितीयेसवनेन जह्युः॥ आयुष्मंतः श्रियमेषांबदंतोवयंदेवानांसम
तोस्यामस्वाहेत्येतयाध्वर्युःजुहोतायथावेदमितरेजुह्वत्यथप्रदक्षिणमावृत्य सदोभिपवमानंसर्पंत्यथसदसियथायतनमुपविशंतितथोद्गात्रे
वाप्रस्तोत्रे वाबर्हिषीप्रयच्छत्यृक्सामयोरुपस्तरणमसिमिथुनस्यप्रजात्याइतिवातृणमीवातथापाकरणंजपति वायुर्हिंकर्तेतिसएषपंचदशोमा
ध्यंदिनः पवमानोभवतितस्याष्टम्यांप्रस्तुतायांवान्वयति सुपर्णोसित्रिष्टुप्छंदा अनुत्वारभेस्वस्तिमासंपारयेत्यत्रवतुर्होतारंव्याचष्टउद्गुतेसाग्नि
संप्रेषमाहाग्नीदग्नीन्विहर बर्हिस्तृणाहिपुरोडाशाँ अलंकुरु प्रतिप्रस्थातर्दधिघर्मायदध्याहरहियजमानेतियथासंप्रेषंतोकुरुतस्तथापउपस्प
श्यपूर्वयाद्वाराहविर्धानंप्रपाद्यतथासमस्तैराजानमुपतिष्ठंतेयथावकाशंश्चरतितथाप्रचरण्यानवरुत्वाग्रहीतितथैवाग्नीध्रं आग्नीध्रीयाद्धिष्ण्या
ननुपूर्वंधिष्ण्यंवगाराग्निहरतितथापुरस्तात्प्रत्यङ्ःसीनोविहृतानधिष्ण्यानुव्याघारयतितथोत्तरस्यहविर्धानस्यचुबुकंप्रचरणींसादयतित
थासीकाशिनेनयथाष्टघ्यांस्तृणातिसंततांगार्हपत्यादाहवनीयात्॥ २॥ अथांतरेण हविर्धानेउपविश्य दधिघर्मायदधियाचतितदाहृतमवे
क्षतेज्योतिरसिवैश्वानरंपृश्निये दुग्धमितिबर्हिषीअंतर्धायकंसेवाचमसेवागृह्णातियावर्ता घावापृथिवीमहित्वायावच्चसंप्तसिंधवोवितस्थुः॥
तावंतमिंद्रतेग्रहंसहोर्जागृह्णाम्यस्तृतमित्यपाघ्यस्यबर्हिषीअर्थेनंश्रीणातिवाक्त्वामनश्चश्रीणीतांप्राणश्चत्वापानश्चश्रीणीतांचक्षुश्चत्वा



श्रोत्रंचश्रीणीतांदक्षश्चत्वाबलंचश्रीणीतामोजश्चत्वासहश्चश्रीणीतामायुश्चत्वाजराचश्रीणीतामात्माचत्वातनूश्चश्रीणीतांशृतोसिशृतंकृतःशृ
तायत्वाशृतेभ्यस्त्वाशृतंकृण्वित्यथाहहोतर्वदस्वयत्तेवाद्यमित्यथैनमाहयाहिपात्तिघमाहश्रातंहविरित्यत्याक्रम्याश्राव्याहदधिघर्मस्ययजेति
वषट्कृतेजुहोतियमिंद्रमाहुर्वरुणंयमाहुर्यंमित्रमाहुर्यमुसत्यमाहुर्योदेवानांदेवतमस्तपोजास्तस्मैत्वातेभ्यस्त्वास्वाहेत्यनुवषट्कृतेजुह्वा
हरतिभक्षंसयावंतःप्रवर्ग्यस्यर्त्विजस्तेषूपहवमिष्ट्वायजमानएवप्रत्यक्षंभक्षयतिमयित्यदिंद्रियंमहन्मयिदक्षोमयिक्रतुः॥ मयिधायिसुवीर्यं
त्रिशुग्घर्मोविभातुमे॥ आकूत्यापयसासहविराजाज्योतिषासहयज्ञेनपयसासहब्रह्मणातेजसासहक्षत्रेणयशसासहसत्येनतपसासहत
स्यमधुमतउपहूतस्योपहूतोभक्षयामीतिनिर्णिज्यपात्रंमयःछातितथासवनीयान्पुरोडाशान्याचतितिपांतथैवसमवद्यन्ननाहमाध्यंदि
नस्यसवनस्येंद्रायपुरोडाशानामवदीयमानानामनुब्रूहीतिपूर्वार्धा
दवदायापरार्धादवद्यत्यभिघारयतिप्रत्यनक्तितथापभृतिस्विष्टकृतंसर्वेषांसकृत्सकृदुत्तरार्धादवद्यतिद्विरभिघारयतिनप्रत्यनक्त्येत्याक्रम्या
श्राव्याहमाध्यंदिनस्यसवनस्येंद्रायपुरोडाशानप्रस्थितान्प्रेष्यतिवषट्कृतेजुहोतितथासमावपमानआहाग्नयेनुब्रूहीत्याश्राव्याहाग्नयेप्रे
ष्येतिवषट्कृतउत्तरार्धपूर्वार्धेतिहायद्वौआहुतीजुहोतितथोद्गुःत्याक्रम्ययथायतनंस्रुचौसादयित्वातथैवपात्र्यामिडांसमवधायप्रतीचः
पुरोडाशान्प्रहिण्वंत्यनुद्रेकेसंयंतिपश्चावडइतिवदंतोथप्राडाशन्नाशान्नीयमानेभ्योनुब्रूहिहोतुश्चमसमनून्नयंध्वमुभयतःशुक्रान्कुरुध्व

बौ० क० सू०
७५

मच्छावाकस्य चमसमाध्वर्यो पिलमुन्नयस्व प्रतिप्रस्थातश्चातुर्भिर्मा ग्राकेः श्रोक्षिता प्रोक्षितैः प्रत्या पकं वस्वेति यथा संप्रेषं तं कुर्वंति समानं कर्मा
श्रावणात्॥ ३॥ आश्रावणाएवं त्यथाध्वर्युः पुरस्तात्प्रत्यङ्तिष्ठन्नाश्रावयत्याश्रावयास्तु श्रौषण्माध्यंदिनस्य सवनस्य निष्केवल्यस्य भाग
स्य शुक्रयंतां मंथिवंताम धुश्चुतं इंद्राय सोमान्प्रस्थिता न्प्रेष्येति वषट्कृते सद्धोमी जुहुतः सप्रथमः संकृताविश्वकर्मेति वषट्कृतानुवषट्कृते
द्विर्जुहुतस्तथैव द्विर्द्विः सर्वांश्चमसान्जुहूतितथा संप्रेषमाहप्रेतु होतुश्चमसः प्रब्रह्मण इति तथैव प्रदक्षिणमावृत्य होतृचमसं ग्रहस्य संस्रा
वमवनयति तथा प्रतिप्रस्थाता त्तराधं आहवनीयस्य मंथिनः संस्रावं जुहोति तथा पुरस्तच्युश्च शुक्रपात्रं चरवं रयथायतनं सादयति यस्यैतम ह्वेति
जां चमसा अथैतं होत्रकाणां चमसाध्वर्यवः सकृत्सकृद्द्रोणकलशादभ्युन्नीयोपावर्तंते पातंथ्ये वं मैत्रावरुणा चमसमादायाश्राव्याह प्रशास्तर्यजेति
वषट्कृतानुवषट्कृते द्विर्जुहोति प्रत्यन्यजं पातयं जनस्थं जाच्छावाकयजाग्नीध्रयजेति षड्ढोत्राः संयाज्य प्रदक्षिणमावृत्य प्रत्यङ्ङुद्द्रुत्याग्रेणाहो
तारमुपविशत्यपाङ्गीध्रइति सभद्रमकरित्याह होतायोनः सोमं राजानं पाययिष्यतीति तथापउपस्थन्य होत्रङामुपाह्वयंते उपहूयमानायामिडा
यामुप प्रगृह्णंति चमसानुपहूतायामिडायामग्नीध्र आदधाति षडुवत्तं प्राश्नंति मार्जयंत उपहूताश्चमसान्भक्षयंति भक्षेहिमाविशाति दी
र्घभक्षमनुद्रुत्य रुद्रवद्गणस्य सोमदेववंतमति विदोमाध्यंदिनस्य सवनस्य त्रिष्टुप्छंदस इंद्रपीतस्य मधुमत उपहूतस्योपहूतो भक्षयामीति होतृच
मसं यंतत्रयः समुपहूय भक्षयंति यथा चमसं चमसान्हिन्वमहुल्यात्मानं प्रत्यभिमृशंत आप्याययंति चमसानाप्यायस्वसमेतु त इति सीदंतिना ७५

राशंसा आप्यायिता दक्षिणास्य द्रोणविधानस्या पालंबमधोधस्तनीयायमरुत्वतीयायेतस्मिन्काल आग्नीध्रे यजमानः पुरोडाशानां प्राश्नाति यस्य
नाम्यास्त्नीपति गालू॥ ४॥ अथ दाक्षिणानि होष्यन्नुयाचल्याज्यस्थालीः संस्रुवाः स्रुचं वाहेवांसस्तं स्येतस्यवमनस्यां तमायांदशायां हिर
ण्यशल्कः प्रग्रथितो भवन्यत्तसमादायाहियजमानेन्वत्तरेणाग्नीध्रीयं परीत्योत्तरेण सदः परीत्य पूर्वया द्वारा शालां प्रपाद्य समन्वारब्धे षुवषित्र
तेषु मंत्र प्रच्छन्नं सुगार्हपत्यआज्यं विलाप्योत्पूयस्रुचि चतुर्गृहीतं गृहीत्वा वसनस्यांतः स्रुग्दंड उपसंगृह्य संसारीभ्याम्भ्यां गार्हपत्ये जुहोत्युदुत्यं
जातवेदसं देवंवहंति केतवः॥ इत्तेनविश्वायसूर्यं स्वाहेत्यपरं चतुर्गृहीतं गृहीत्वा वसनस्यांतः स्रुग्दंड उपसंगृह्य नयवल्यचाग्नीध्रे जुहोत्यग्नेनय
सुपथा राये अ० धेम स्वाहेत्यथ दिवं गच्छसुवः पतेति हिरण्यं हुत्वा जुहोति ४० गार्हपत्य एव जुहोति चित्रं देवानामुद० षश्च स्वाहेत्यथाग्नीध्रे हुत्वा
स्रुचि चतुर्गृहीतं गृहीत्वा ४५ स व्यंते दक्षिणा दक्षिणापथेनां तरेण सदश्च गार्हपत्यं चांतरेण सदश्चाग्नीध्रं चांतरेण चात्वालोत्करौ वसुमदीच्यः
प्रतिपद्यंते ताः प्रदक्षिणं कृत्वाभ्यैति रूपेण वो रूपमभ्यैमि वयसा वय इत्यथैनाविभजति तुथो वो विश्ववेदा विभजतु वर्षिष्ठे अधि नाक इत्थ सदोभ्यैत्यैतत्ते
अग्ने राध ऐति सोमच्युतं तन्मित्रस्य पथा प्रेत यतस्य पथा प्रेतचंद्र दक्षिणा यज्ञस्य पथा सुविता नयंतीरिति॥ ५॥ अथैष आत्रेयाग्रेण सद आस्ते
तमभ्यैति ब्राह्मणमद्य राध्यासमृषिमार्षेयं पितृमंतं पैतृमत्यं सुधातुदक्षिणमित्यथैनमुक्रम्य पृच्छति क आत्रेय इत्ययमहमितीतरः प्रत्याह
तं तथैव द्वितीयमुक्रम्य पृच्छति क आत्रेय इत्ययमहमितीतरः प्रत्याह तं तथैव तृतीयमुक्रम्य पृच्छति क आत्रेय इत्ययमहमित्येवेतरः प्रत्या

Indira Gandhi National
Centre for the Arts

दतस्य पाणौ हिरण्यमादधाति चंद्रं मं इति यदु चान्यादुपकल्पयंत्तथाग्नीध्रं हुत्वा हिरण्यमुखमग्नीधे ददात्यथ सद आगत्य ब्रह्मणे ददाति हो
त्र उद्गात्रेऽथ हविर्धाने हुत्वाध्वर्यवे ददाति यदु चैनमन्योभिमतो भवंत्यथ सद आगत्य प्रस्तोत्रे ददाति प्रग्रावस्तुब्राह्मणाच्छंसिने छावाकस्य सद
स्याग्नीध्रः पातु नेष्टुर्ग्रीवस्कंत उन्नेतुः स ब्रह्मण्यस्य प्रतिहर्तुरं ततो यथा समुदितं प्रसर्पकेभ्योथाहिं हि यजमानेत्याग्नीध्रं हुत्वास्क विचतुर्गृहीतं गृही
त्वाग्नीध्रे पंचवैश्वकर्मणानि जुहोति यज्ञपतिमृषय एनसाहुरित्यथातिक्रमातीमाक्षैश्वरत्यग्निनादेवेन येदेवाय हूनइत्येताभ्यामनुवाकाभ्यामथय
जमानं प्राचमीक्षयंति विस्रुवः पश्यंत्यंतरिक्षमित्यथैनं सदस्क पर्वत्रायति यत स्वसदंस्यैरित्यथ दक्षिणाः समनुदिशत्यस्मद्दात्रा देवत्रा गच्छत मधुम
तीः प्रदातारमाविशतानवहायास्मान्देवयानेन पथेत सुकृतां लोके सीदत तन्नः संस्कृतमिति ॥ ८ ॥ अथ प्राउनयन्नाहेंद्राय मरुत्वतेनुब्रूहीति तद्धु
त्वा प्रतिप्रस्थाता प्रस्नावादयापनिष्क्रामत्यपनिष्क्रांतस्यैवाध्वर्युग्रावाह्नावादत्त उत्तरतस्तिष्ठंत प्रतिप्रस्थात्रेन्यतरं प्रयच्छत्यथाश्रावयत्योश्रावयास्तु श्रौष
इंद्राय मरुत्वते प्रेष्येति वषट्कृतानुवषट्कृते जुहोत्यथ प्रतिप्रस्थाताध्वर्योः पात्रे ग्रहस्य संस्रावमवनयति तमाह प्रतिप्रस्थातरेतेन पात्रेण तती
यं मरुत्वतीयं गृहाणेति तेन प्रतिप्रस्थाता तृतीयं मरुत्वतीयं ग्रहं गृह्णाति द्रोणकलशान्परिप्लुनापात्रेण मरुत्वां इंद्र वृषभो रणायेत्यनुद्रुत्योपयामगृ
हीतोसीद्राय त्वा मरुत्वत एष ते योनिरिंद्राय त्वा मरुत्वत इत्यथाध्वर्युः प्रदक्षिणमावृत्य प्रत्यङ्ङाहुत्य होत्रे तत्पात्रं संभक्ष
यतीद्र पाम रुत्वता पीतस्येत्यथानिग्रहपात्रं पराङावर्तत इडाविवहूतारितियावेदतस्य यजुषः पर्याप्नोति तावज्जपत्यथैनमाह्वयते होता प्रत्याह्वयते 

ध्वर्युः शंसावोमिति प्रतिगृणाति प्रसिद्धमुक्थं प्रतिगीर्य प्राङेत्या यच्छत एतं तृतीयं मरुत्वतीयं ग्रहमनूच्य ऐ तेनाराशंसानथाश्रावयत्योश्रावयास्तु
श्रौषडुक्थशा यज सोमस्येति वषट्कृतानुवषट्कृते जुहोति तथैवाहुर्ह्निराशंसाननुप्रकंपयंत्यत पात्रं नाराशंसा अन्वायत्यनुसवनभक्ष
इंद्रेण मरुत्वता पीतस्येति होतांश्चैवाध्वर्युश्चैतत्पात्रं संभक्षयतान राशंसपीतननाराशंसान्नाराशंसपीतस्य सोमदेवतं मति विदो माध्यंदिनस्य
सवनस्य त्रिष्टुप् छंदसः पितृपीतस्य मधुमत उपहूतस्योपहूतो भक्षयामीति होतृचमसमेवैतत्त्रयः समुपहूय भक्षयंति यथा चमसं चमसान्हिन्वमङ
त्वात्मानं प्रत्यभिमृशंत आप्याययंति चमसानाप्यायस्व समेतु त इति सीदंति नाराशंसा आप्यायिता दक्षिणस्य हविर्धानस्यापालंबमधोधो माहेंद्रा
य ॥ ७ ॥ अथ प्राउत्य शुक्रपात्रमाददान अहान्नेत यदेमं माहेंद्रं ग्रहं गृह्णाम्यथो [illegible] दं चरं राजानं पूतभृतमभिसंपवयताद्राभिद्रोणक
लशं मृष्ठान्युक्षतादिति स तथा करोति स शुक्रपात्रेण माहेंद्रं द्रोणकलशाद्गृह्णाति महां इंद्रो य ओजसेत्यनुद्रुत्योपयामगृहीतोसि म
हेंद्राय त्वा जुष्टं गृह्णामीति परिमृज्य सादयत्येष ते योनिर्महेंद्राय त्वेत्यथ पशुपस्त्यव्य बर्हिषी आदाय यवाचं यमः प्रत्यङ् द्रुत्वा स्तोत्रमुपाकरो
ति स्तुवंत माहेंद्राय प्रस्तुतं मास्मि संप्रेषमहाभिषा तारोभिषुणुताग्नीदाशिरं विनयामूखरूमुद्वाद्यप्रतिप्रस्थातवारुणमेककपालं निर्वपसा
म्यस्याविडीति यथा संप्रेषं तं कुर्वंति होत्रपणोत्तमेति प्राकुहोतुः कालात्पराङावर्तते ध्वर्युरथैनमाह्वयते ध्वर्युः शंसावोमिति प्रतिगृणाति प्रसिद्धम
क्थं प्रतिगीर्य प्राङेत्या यच्छत एतं माहेंद्रं ग्रहमनूच्य ऐ तेनाराशंसानथाश्रावयत्योश्रावयास्तु श्रौषडुक्थशा यज सोमस्येति वषट्कृतानुव

Indira Gandhi National
Centre for the Arts

बौ० क० सू०
७७

पत्रूतस्मिन्कालेनोतितथैवर्हिद्दैनोग्रहः सान्ननुप्रकंपयंत्यैतस्यान्नेनाराशंसा भक्षार्यत्यनु सवनभक्षोमंहंद्रेणापीतस्यतिक्षौतोचैवाध्वर्युर्गृह्णे
तस्यात्रंसंभक्षयतेनराशंसपीतिननाराशंसान्नराशंसपीतस्य सोमंदेवतमातिविदोमाध्यंदिनस्यसवनस्यत्रिष्टुपृछंदसःपितृपीतस्यम
धुमतउपहूतस्योपहूतोभक्षयामीतिहोतृचमसमेवंतत्रयः समुपहूयभक्षयंतियथाचमसंचमसमान्हिन्वमदत्यात्मानंप्रत्यभिमृशंतेनाप्याय
यंतिचमसान्त्सर्वभक्षाभाजेयंतेथंद्रायत्वंद्रायत्वेत्यवंत्रिभिरुक्थपर्यायैश्वरंतितंतथैवोन्नमेतिहोत्रछावाकस्यचमसमनून्नयध्वमुन्नेतः
सर्वराएवराजानमुन्नयमातिरिरचःप्रतिप्रस्थातरूपैतनग्रहूपारंभेह्वयजमानंतिपूर्वयाद्वाराहविर्धानंप्रपाद्यथोदुन्नाधवनीयंसर्वग्रा
णवचसतीवरीःपर्यस्यतिसर्वग्राणवंकधनान्पुरोसंमवचसतीवरीःकलशांस्मस्थान्युन्नतिपश्वादेक्षमेकधनानछावाकचमसमेवप्रथममुन्नयं
तियथापपादमितरानत्सर्वराणवराजानंसमुन्नीयोत्तरवेद्याःसंसादयंत्यथादत्ता उक्थ्यस्थाल्या ओपयायंपात्रंतस्मिन्नतःसर्वराणवराजानंगृ
ह्णातियउक्थ्यस्थाल्यांभवतिसउएंद्रएवभवत्यथोक्थ्यवाचीत्याहमाध्यंदिनंसवनंप्रतिगीर्यग्रहास्तःप्रसृतीतिसर्पंतेत्याहप्रग्राहस्तासंतिष्ठतेमा
ध्यंदिनंसवनं॥८॥ ॥इतिबौधायनकल्पसूत्रेनवमःप्रश्नः॥९॥ ॥प्रसंर्पतितृतीयसवनायदवीद्वाराविस्यतएवोर्ध्वेनसंप्रसृप्तान्विदित्वाध्वर्युःप्राङु ७७
यन्नात्याग्नीत्परिश्रयणमाहरप्रतिप्रस्थातराशिरमानयश्चतातंक्य माद्वित्यग्रहायदध्याहरेहिप्यजमानंतिपूर्वयाद्वाराहविर्धानंप्रपाद्ययएषउपांशु
पात्रेंशुःप्रास्तोभवतितंमाध्यंदिनीयऋजीषेपिसृज्ययमेवकंचनग्रावाणमादायोन्नेतारमाहाहरोपसृजेत्यपसृजत्यन्नेताधवनीयादुद

चंमनापरिमितमभिषुत्याथैनंमसंभृतंसंभरण्यासंभृत्योन्नेत्रउत्सयच्छतितमुन्नेताधवनीयेवनयत्येवमेवद्वितीयःपर्यायःसंतिष्ठतएवं
तृतीयऋजीषमंततोदशापवित्रेणपरिवेष्ट्योन्नेत्रउत्सयच्छतितदुन्नेताधवनीयविक्षाल्यप्रचीक्षदक्षिणास्यहविर्धानस्यांतरेणैषेउपातिह
त्यनीउउत्सादयतिपरिश्रयंतिपूर्वोद्वारमपरांचाथादत्त आदित्यस्थाल्या ओपयायंपात्रंतस्मिन्नेतस्यराजस्तृतीयवेकांगृह्णातियआदित्य
स्थाल्यांभवतिकदाचनस्तरीरसीत्यनुद्रुत्योपयामगृहीतोस्यादित्येभ्यस्त्वाजुष्टंगृह्णामीत्यपाहृत्यबर्हिषीअउर्धकंकारोराज्ञोगृह्णातियज्ञो
देवानांप्रत्येतिसुम्नमित्यनुद्रुत्योपयामगृहीतोस्यादित्येभ्यस्त्वाजुष्टंगृह्णामीत्यथैनंस्तविमतउपांशुसवनेनश्रीणातिविवस्वआदित्येषतेसो
मपीथस्तेनमंदस्वतेनतृप्यतृप्यास्मंतवयंतर्पयितारोयादिव्यावृष्टिस्तयात्वाश्रीणामीत्यथैनमुपहृत्याऽवज्ञानमुपैतियदिताजप्रेक्षं संकेदूर्षु
कःपर्जन्यस्यावृष्ट्याविरमवर्षुकोनसादयतीतिब्राह्मणमथैनमुपांशुसवनंदशापवित्रेणपरिवेष्ट्यतेनाधस्तात्पात्रमुपसंस्पृश्यकारमविषिंचन्
॥१॥आसमुद्रादंतरिक्षात्प्रजापतिरुदधिंच्यावयातींद्रःप्रस्नौतुमरुतोवर्षयंतून्नंभयपृथिवींभिंधीदंदिव्यंनभउद्रोदिव्यस्यनोदेहीशा
नोविसृजाहतिमित्यथैनमुपांशुसवनंदशापवित्रेणपरिमृज्यग्रावस्वपिसृजतिविवृण्वंतिपूर्वोद्वारमपरांचाथैतंग्रहंवर्हिष्ठेस्तेनापिधायो
पोत्तिष्ठन्नाहादित्येभ्यःप्रियेभ्यःप्रियधामभ्यःप्रियव्रतेभ्योमहस्वसरस्यपतिभ्यउरोरंतरिक्षस्याध्यक्षेभ्योनुब्रूहीत्यत्याक्रम्याश्राव्याहादित्ये
भ्यो मीतिबर्हिषीअंतर्धायश्चतातंकंचनश्रीणातिकदाचनप्रयुछसीत्यनुद्रुत्योपयामगृहीतोस्यादित्येभ्यस्त्वाजुष्टंगृह्णा ×भ्यःप्रियेभ्यःप्रिय

बौ० क० सू०
७८

धामभ्यः प्रियव्रतेभ्यो महस्वसरस्य पतिभ्य उरोरन्तरिक्षस्याध्यक्षेभ्यः प्रेष्येति वषट्कृत ओषधीः प्रास्याग्नावादित्यं जुहोति सकृदेव न
कृत्वान्वीक्षेत पर्यावर्तन्तस्यैव प्रतिप्रस्थाता पात्रमादत्त एतस्मिन्काले प्रतिहर्ता पूतभृतो बिले पवित्रं वितत्य द्रोणे वा त्रीनुदाराज्ञ उदचनाना
नयन्नाग्रयणमेवाध्वर्युरादत्त आदित्यस्थालीं प्रतिप्रस्थाता सा पञ्चायाः संगृह्णाति तासां तिसृणां चतसृणां वा धाराणां तथोपरिष्टादा
ग्रयणमानीयाधस्तादुपरिगृह्णाति तं तथैव त्रिरभिहिंकृत्य परिमृज्य सादयति नो वध्यगृह्णात्यपोऽस्यपवित्रं वार्हिर्धा अन्तर्धायाभिग
मवनयत्यन्वारब्धायां पत्न्याम मन्द्या मा वपुषा चिकित्सतेति चतसृभिरनुछन्दसमपोऽस्य बर्हिषा पूतभृतो बिले द्रप्सानुमन्त्रयते द्रोणपवमा
नस्यग्रहं गृह्णाति तथान्तरिक्ष्याद्व्याहृप्रीचः राजानं पूतभृतमभिसंप्लवयतादन्याभिराधवनीयं मध्वान्युक्तानादि तिसतथाकरोति तथा पउप
स्पृश्य बर्हिषी आदायाध्वर्युः सर्पति तं तथैव समन्वारब्धा आहवनीयस्रुवाकृतिं जुहोतीदं तृतीयं सवनं कवीनामृतेन ये चमसं मेरयन्ता इति
सोमधन्वनाः स्रुवरानयानाः स्विष्टं नो अभिवस्सीयानयं तु स्वाहेत्येतयाध्वर्युः जुहुतो यथा विहमितं स्रुच छति तथा प्रदक्षिणमावृत्य सदोऽभिपव
मानं सर्पन्ति तथा सदसि यथायतनमुपविशन्ति तथा जात्रिवा त्रस्तोत्रिवा बर्हिषा प्रयच्छन्त्युक्थ्यसाम यारुपस्तरणमसि मिथुनस्य प्रजात्या इति यातू
र्मीवा तथापाकरणं जपति वायुर्हिंकर्त्तेति स एष सप्तदशाभवः पवमानो भवति तस्य नवम्यां प्रस्तुतायां वाचयति सघासि जगती छंदा अनु त्वारभस्व ७८
स्तिमा संपारयेत्यथ पञ्चहोतारं व्याचष्ट उद्गातृसाम्नि संप्रैषमाग्नीध्राग्नीन्विहर बर्हिस्तृणाहि पुरोडाशाँ अलंकुरु प्रतिप्रस्थातः पशुना सं

वदस्वेति यथा संप्रैषं ते कुर्वन्ति तथाप उपस्पृश्याग्निमिय जमानेति पूर्वया द्वारा हविर्धानं प्रपाद्य तथा समस्तं राजानमुपतिष्ठते नात्रावकाशोऽभ्य
रति तथाप्रचरण्यां नव कृत्वो गृह्णाति तथैव आग्नीध्र आग्नीध्रीयाधिष्ण्यदनुपूर्व्यं धिष्ण्यान्विहरति तथा पुरस्तात्प्रत्यङ्ङासी
नो विहृतान् धिष्ण्याकान्व्याधारयति तथाध्वर्युरस्य हविर्धानस्य चुबुके प्रचरणीं सादयति तथासौ काशिनेन यथापृष्ठ्याः स्तृणाति स ततो
गार्हपत्याद्दाहवनीयान् ॥ ५ ॥ अथ पशुना चरति मनोताप्रभृतीडान्तेन तथा सवनीयान्पुरोडाशान्याचति तेषां तथैव समवद्यन्त्याहृत तृतीय
स्य सवनस्यैन्द्राय पुरोडाशानामवदीयमानानामनुब्रूहीति पूर्वार्धादवदाय परार्धादवद्यत्यभिघारयति न प्रत्यनक्ति तथा प्रभृति स्विष्टकृते
सर्वेषां सकृत्सकृदुत्तरार्धादवद्यति द्विरभिघारयति न प्रत्यनक्त्यत्याक्रम्याश्राव्याह तृतीयस्य सवनस्यैन्द्राय पुरोडाशान्प्रस्थितान्प्रेष्येति
वषट्कृते जुहोति तथा समावपमान आह्राग्नयेऽनुब्रूहीत्याश्राव्याहाग्नये प्रेष्येति वषट्कृत उत्तरार्धपूर्वार्धे तदायपूर्वी आकुती जुहोति त
योदङ्ङत्याक्रम्य यथायतनं स्रुचौ सादयित्वा तथैव पात्र्यामिडां समवधाय प्रत्तीचः पुरोडाशान्प्रक्षिणात्यनुहेकसंयति पञ्चावत्तेति वदंतो
यथा डा यन्नाह्रीन्नीयमानेभ्योऽनुब्रूहि होतुश्चमसमन्वयध्वं तीव्राः आशीर्वतः कुरुध्वमुन्नेतः सोमं प्रभावयेति होतृचमसमेव प्रथममुन्नयति
यथापपारमितरानस्समुन्नीयान्नरवैथ्याः सः सादयंत्यथ प्राङ्ङत्याक्रम्य होतृचमसमादायाश्राव्याह तृतीयस्य सवनस्य ऋभुमतो विभुमतः प्रभुमतो वा
जवतः सवितृवतो बृहस्पतिवतो विश्वदेव्यावतस्तीव्रां आशीर्वत इन्द्राय सोमान्प्रस्थितान्प्रेष्येति वषट्कृते जुहोति श्येनाय पत्वने स्वाहेत्यनु

Indira Gandhi National
Centre for the Arts

बौ० क० सू०
७०

वषट्कृते तं पतां होत्रा मधो घृतस्य स्वाहेति वषट्कृतानुवषट्कृते हुते होता तिर्यं च नहोदृैः सर्वांश्चमसानुजुहोति तथैव संप्रेषमाह प्रतुम्
तुश्च मसः प्रब्रह्मणः प्रोद्गातुः प्रयजमानस्य प्रसदस्यस्य होत्रकाणां चमसाध्वर्यवः सकृत्सकृद्धोत्रीर्वतीभ्युन्नीयोपावर्तध्वमिति यं त्येते मद्दार्च
जांचमसास्तथैव होत्रकाणां चमसाध्वर्यवः सकृत्सकृद्धोत्रीर्वतीभ्युन्नीयोपावर्तंते तेपातथैव मैत्रावरुणचमसमादायाश्राव्याह प्रस्तोत्रा यजे
तिवषट्कृते जुहोति विष्टंभाय धर्मणे स्वाहेति परिधयं जनप्रथनायेति ब्राह्मणाछंसिनउर्जे होत्राणामिति पोतुः पयसे होत्राणामिति नेष्टुः
प्रजापतये मनवइति च्छावाकस्य तेमतपाः ऋतुयाजिनश्च मसं चमसमेवानुवषट्करोतितं पतां होत्रा मधो घृतस्य स्वाहेति समहो
त्राः संयाज्य प्रदक्षिणमावृत्य प्रसृत्याद्भुत्याग्रेण होतारमुपविश्यान्ययाग्नीदिति सभद्रमकरित्याह होतायानः सोमं राजानं पाययिष्यतीति
तथा पउपस्थ्य होत्र इडामुपाघ छंत उपहूयमानायामिडायामुपप्रगृह्णंति चमसानुपहूतायामिडायामग्नीध आदधाति षडवत्तं प्राश्नंति
मार्जयंत इडोपहूतां श्चमसान्भक्षयंति भक्षेहि माविशेति दीर्घ भक्षमनुद्रुत्या दित्या व द्रूणस्य सोमदेवत्तं भतिविदरतीयस्य सवनस्य ज
गतीछंदस इंद्रपीतस्य मधुमत उपहूतस्योपहूतोभक्षयामीति होतृचमसंमेवेतत्रयः समुपहूय भक्षयं यथा चमसं चमसानां न्यहन्य मडथा
प्यानंत्रत्यभिमृश्य त आप्यायंति चमसानाप्यायस्व समेतु त इति सीदंति नाराशंसा आप्यायिता दक्षिणस्य हविर्धानस्यापालंबमधो धउपा
सनयतीवैश्वदेवाय चमसाय चमसीयेच त्रीं स्त्रीन्पुरोडाशशकलानुपास्यति नवहोतृचमसं तानतएवानुमंत्रयंतेऽत्र पितरो यथाभागमंद ७०

ध्वमिति फलीकृते तस्मिन्काल आग्नीध्रे यजमानः पुरोडाशानां प्राश्नाति यद्वानास्यास्पत्नीपलि इति ॥ ३ ॥ अथ प्राडाय न्याह देवाय सवित्रनु
ब्रूहि प्रतिप्रस्थातारं तर्यामपात्रेण सावित्रमाग्रयणाद्गृहं गृहीत्योपास्व मासीपद इति तद्गृत्वा प्रतिप्रस्थाता तर्यामपात्रेण सावित्रमाग्र
यणाद्गृहं गृह्णाति वाममद्य सवितरित्यनुद्रुत्यो पयामगृहीतोसि देवाय त्वा सवित्रे जुष्टं गृह्णामीति न सादयतीति ब्राह्मणमसादयित्वैवो
पनिष्क्रम्याश्राव्याह देवाय सवित्रे प्रेष्येति वषट्कृते जुहोत्यथ वै भवति सवितृपात्रेणा वैश्वदेवं कलशाद्गृह्णाति सोमं सोममभिगृह्णाति
ऋपयामगृहीतोसि सुशर्मासि सुप्रतिष्ठानो बृहदुक्षे नमो विश्वेभ्यस्त्वा देवेभ्यो जुष्टं गृह्णामीति परिमृज्य सादयत्येष ते योनिर्विश्वेभ्य
स्त्वा देवेभ्य इत्यथाध्वर्युः प्रदक्षिणमावृत्य प्रसृत्याद्भुत्य होत्रासमीक्ष्य पराङावर्तत इडा देवहूरिति यावदंतस्य यजुषः पर्याप्नोति तावज्ज
पत्यथैनमाह्वयते होताप्रत्याह्वयतेध्वर्युः शंसति प्रतिगृणात्यथ यत्र होतुरभिजानात्येकया च दशभिश्च स्वभूत इति तत्प्रतिप्रस्थाता
ह्विदेवत्य पात्राणि मार्जालीये मार्जयित्वा पात्रेष्वपिसृजत्यथ यत्र होतुरभिजानाति प्रद्यावा यज्ञैः पृथिवी ऋतावृधेति तदन्यतामदं प्रतिगृ
णात्योथामोदैवमदामोदैवत्याथ्यासावादथ यत्र होतुरभिजानाति तद्वाधा अस्य सवितुर्वरेण्यमिति तदुभयतामदमेवमेव प्रतिगृणाति मदा
मोदैवमो दामोदैवत्याथ्यासावान्प्रसिद्धमुक्थं प्रतिगीर्य प्राङेत्याचष्टे तएतं वैश्वदेवं ग्रहमनुरचष्टेत नाराशंसान थाश्रावयन्नाश्रावया
स्त श्रौषडुक्थ्यशा यजसोमस्येति वषट्कृतानुवषट्कृते हुते जुहोति तथैव हुताद्दैनाराशंसानन्न प्रकंपयंत्येतस्यात्रं नाराशंसा अन्वायंत्यनु

Indira Gandhi National
Centre for the Arts

सवनभक्षो विश्वैर्देवैः पीतस्येति होतां चैवाध्वर्युश्चैतस्मात्रं संभक्षयतां नराशं सपीतननाराशं सान्नराशं सपीतस्य सोम देवतमतिवि
दस्तृतीयस्य सवनस्य जगतीछंदसः पित पीतस्य मधुमत उपहूतस्योपहूतो भक्षयामीति होता चमसं सं मवेतत्र यः समुपहूय भक्षयंति यथा
चमसं चमसान् ह्निन्वमद्ग्यात्मानं प्रत्यभिमृश्य तेनाप्याययंति चमसानेसर्वभक्षमार्जयंते ॥ ४॥ अथ होतारं विपृच्छति पर्यक्ष्यसि सो
म्या३ न्नपर्यक्ष्यसी ३ इति मयुर्थेनं होता प्रत्याहृतपृ त्वा सोम्यमागच्छत्यथ स्रुचि चतुर्गृहीतं गृहीत्वात्याक्रम्याश्राव्याह घृतस्य यजेति
वषट्कृते जुहोत्यथोपस्तीर्य द्विरभिघारयति पूर्वार्धादवद्यायापरार्धाद्वद्यत्यभिघारयति न प्रत्यनक्त्यात्याक्रम्याश्राव्याह सोम्यस्य
यजेति वषट्कृते दक्षिणार्धपूर्वार्धे प्राचीनावीती सोम्यं जुहोत्यथैनं वेक्षमव्य चोस्कवाकुत्याभिजुहोति विश्वेमा त्वन्नोअंतम इति यथुर्वेहो
ताग्नावेक्षमव्य चोपरियजति संपन्नमिति नाह्रियेत तस्मिन्नाज्यमानीयावेक्षते पवित्रं वै सोम्य आत्मानमेवपवयते य आत्मानं परिपश्ये
दिता स्कस्यादभिदर्दिकृत्वावेक्षेतेति तस्मिन्नभ्यय आज्यमानीयावेक्षते यन्मे मनः परागतं यद्वामे अपरागतं राज्ञा सोमेन तद्वयमस्मासु धार
यामसीति मन एवात्मन् दाधारनगतमनाभवतीति ब्राह्मणमथैनमुज्ञात्म्योहरंति तस्मिंस्तन्वेर्दंति यत्तेविदुरथ प्राञ्च यन्नाह प्रतिप्रस्था
तरुपांशुपात्रेण पात्नीवतमाग्रयणाद्गृह्णात्युपयामगृहीतोसि बृहस्पतिसुतस्य त इंदो इंद्रियावतः पत्नीवंतं ग्रहं गृह्णाम्यग्ना३इ ८०
पत्नीवा३ इति वर्हिषी अंतर्धाय घृतेन श्रीणात्यहं परस्तादहमवस्ताद्द्यज्योतिषावितमोववार ॥ यदंतरिक्षं तदुमेपिताभूदहं सूर्यमुभ

यतो ददर्शाहं भूयासमुत्तमः समानानामित्यपोद्य स्वर्वाहिषानसादयतीति ब्राह्मणमसादयन्नेवोपनिष्क्रम्याश्राव्याहाग्नी३त्पात्नीवत
स्य यजेति वषट्कृते जुहोति सजूर्देवेन त्वष्ट्रा सोमं पिब स्वाहेति कपाठं श्वनुवषट्कृतं कृत्वाहरति भक्षं स यस्मिन्नाग्नीध्र उपहूय
मिच्छत उपैवनेन्ह्वयते नो चैव संभक्षयतः ॥ ५॥ अथाहाग्नीन्नेष्टुरुपस्थमासीद नेष्टः पत्नीमुदानयोद्गात्रा संख्यापयाप उपप्रवर्तयेता
द्गुरुणा प्रवर्तय तानग्नेकल्यारुमुपप्रवर्तयताद्धोतुश्चमसमनून्नयत्यमुन्नेतः सर्वं ग्रावराजानमुन्नयमातिरीरिचः प्रतिप्रस्थात
होतुश्चमसे भक्षयाव कागं कुरुतादिति यजमानमिति पूर्वया द्वारा हविर्धानं प्रपाद्य यजमानं भक्षमुपस्थापयति भृतमसि भृतमाधामुख
मसि मुखं भूयासमिति होतृचमसं मसं मेव प्रथममुन्नयंति यथायथापार्दमितरोत्सर्वं ग्रावराजानं समुन्नीयोत्तरवेद्याः सं सादयंत्यथाप
उपस्थ उपवर्हिषि आदाय वाचंयमः प्रत्यङ् द्रुत्वा रंताग्नमुपाकरोति स्तुवत यज्ञायज्ञियेनात्र सम्प्रहोतारं याचंतै प्रस्तुते साम्नि नेष्टापा
त्नीमुद्गात्रा संख्यापयति विश्वस्य ते विश्वावतो वृष्णियावत स्तवाग्ने वामीरनुसंदृशि विश्वारेतांसि धिषीया गंदेवान्यज्ञोनि
वीदेवेभ्याय ज्ञमशिषन्नस्मिन्त्सुन्वति यजमान आशिषः स्वाहाकृताः समुद्रेष्ठा गंधर्वमातिष्ठतानु ॥ वातस्य पत्मन्निड ईडिताइ
ति स यदेवैना मुद्गाता प मीयति तदेवापत्न्युरुणा पन्ने जनीरूप प्रवर्तयति नग्नंकल्यारुमुपप्रवर्तयति होत्रं पात्तं मति प्राकृहोतुः का
ात्यराडावर्तत ध्वर्युरभ्यन्नमाह्वयते होता प्रत्याह्वयते ध्वर्युः शंसति प्रतिगृणाति ॥ ६॥ अथयत्र होतुरभिजानाति स्वादुष्किलायं

Indira Gandhi National
Centre for the Arts

मधुमाꣳ उन्नायमितितदुभयतोमदंप्रतिगृणातिमोदामोदैवमदामोदैवेत्याव्याह्वावादथयत्रहोतुरभिजानातितंतंतन्वन्रजसोभा
नुमन्विहीतितत्प्रातिप्रस्थाताध्रुवंपरिगृह्णातिद्यावापृथिवीभ्यांत्वापरिगृह्णामीत्यथैनंप्राच्यावयतिविश्वेत्वादेवावैश्वानराःप्रच्याव
यन्त्वित्यथैनमाहरतिदिविदेवादृꣳहांतरिक्षेवयाꣳसिपृथिव्यांपार्थिवानित्यथैनंहोतृचमसेवनयतिध्रुवंध्रुवेणहविषावसोमंनयाम
सि॥यथानःसर्वमिज्जगदयक्ष्मꣳसुमनाअसत्॥यथानइन्द्रइद्विशःकेवलीःसर्वाःसमनसःकरत्॥यथानःसर्वाइद्दिशोस्माकंकेव
लीरसन्नितिप्रासिच्यमुक्थंप्रतिगीर्यप्राङ्त्याघच्छतएवंहोतृचमसमनूचच्छंतेचमसानथाश्रावयत्याश्रावयारुक्थापडुक्थन्नायजसो
मानामितिवषट्कृतानुवषट्कृतेजुहोतितंथैवद्विर्द्विःसर्वाꣳश्चमसान्जुहुत्यथभक्षःप्रत्यंचआद्रवंत्यनुसवनभक्षोग्निर्नोविश्वा
नरेणमरुद्भिःपीतस्यमधुमतउपहूतस्योपहूतोभक्षयामीतिहोतृचमसमेवतत्रयःसमुपहूयभक्षयंतियथाचमसंचमसान्हिन्वम
उत्यात्मानंप्रत्यभिमृश्यतेनाप्याययंतिचमसानत्सवभक्षामाजयंतेथैताꣳश्चमसानद्भिःपूरयित्वोत्तरेणाहवनीयंप्राचोवोदीचोवाया
तयंतितत्पुत्रोꣳस्त्रीꣳश्चद्रवांग्रथीन्प्रास्यंत्येकंकंचदर्भपुंजीलमथोक्थवाचीद्रायेत्याहतृतीयसवनंप्रतिगीर्यप्रत्नास्तःप्रस्फुहीतिसर्पंत
त्याहप्रत्नास्तासंतिष्ठंतेततृतीयसवनं॥१॥अथसंप्रैषमहाग्नीदीपयजानंगारानाहरोपयष्टरूपसीदब्रह्मन्प्रस्थास्यामःसमिधमाधायाग्नी ८१
त्सरुत्सरुत्संमृड्ढीत्याहरत्येतानाग्नीध्रोदीपयजानंगारांस्तानग्रेणहोतारंनिवपत्स्फसीदत्स्फपयष्टागुदंततीयेनाथाध्वर्युःपृषदाज्यंविल

त्यजुह्वाꣳसमानीयात्याक्रम्याश्राव्याहदेवेभ्यःप्रेष्येतिवषट्कृतेजुहोतिप्रेष्यप्रेष्येत्यकारस्थानूयाजानानिष्ठ्वादद्युःल्याक्रम्ययथायतनꣳस्रु
चोसादयित्वावाजवतीभ्याꣳस्रुचौव्यूहतिगंपुनाप्रस्तरपरिधीनत्संप्रकीर्यसंप्रस्राव्यस्रुचोविमुच्योन्नेतारमाहोन्नेतर्यहस्तप्रचरेति
तघृत्वोन्नेताद्रोणकलशाआग्रयणात्तृतीयंग्रहंगृह्णात्युपयामगृहीतोसिहरिरसिहारियोजनोहर्योःस्थाताव्रजस्यभर्ताप्टश्निःप्रेतात
तेभवतोगणानांत्वागणपतिंहवामहेसइज्जनेनेत्येतामेवनिर्वपेद्यःकामयेतब्रह्मन्विशंविनाशयेयमितिमारुतीयाज्यानुवाक्येकुर्यादितितस्याएतेभवतो
यस्यवोयावःशर्मेति॥२६॥त्रयोदश॥अर्यम्णेचरुंनिर्वपेत्स्वर्गकामइतितस्याएतेभवतोर्यमायातियेतेर्यमन्नित्यर्यम्णेचरुंनिर्वपेद्यःकामयेतदानका
मामेप्रजास्युरितितस्याएतेभवतोर्यम्णेचरुंनिर्वपेद्यःकामयेतस्वस्तिजनतामियामितितस्याएतेभवतोयोराजन्यआनुजावरस्यात्तस्माएतमैंद्रमानु
षूकमेकादशकपालंनिर्वपेदित्यथवैभवतिबृहद्वतीअग्रवतीयाज्यानुवाक्येभवतइतितस्याएतेभवतोबृहद्ग्रमंगिरोभिरर्णोनोबृहद्ग्रेणावि १२६
मायमानेरितियोब्राह्मणआनुजावरस्यात्तस्माएतंबार्हस्पत्यंमानुषूकंचरुंनिर्वपेदित्यथवैभवतिबृहद्वतीअग्रवतीयाज्यानुवाक्येभवतइतितस्याएते

भवतोमहान्महीअस्तभायद्बृहद्योअग्रमभ्यर्योजसेति॥२७॥अथवैभवतियःपापयक्ष्मगृहीतस्यात्तस्माएतमादित्यंचरुंममावास्यायांनिर्वपेदि
तितस्याएतेभवतोनवोनवोभवतिजायमानोयमादित्याअंशुमाप्याययंतीतियंकामयेतान्नादःस्यादितितस्माएतंत्रिधातुंनिर्वपेदिंद्रायराज्ञेपुरो
डाशमेकादशकपालमिंद्रायाधिराजायेंद्रायस्वराज्ञइत्यथदेवस्यत्वासवितुःप्रसवइतिप्रतिपदंकृत्वेंद्रायाधिराजायेंद्रायस्वराज्ञइतिचतुरश्चतुरोमुष्टी
नेकैकस्यैदेवतायैहविष्कृतावाचंविसृजतेसमानंकर्माधिवपनाद्ध्युप्यगार्हपत्यएकादशतानानिकपालान्युपदधात्यथवैभवत्स्त्रीनेषुकपालेष्वधिश्रय
त्ययातयामत्वायत्रयःपुरोडाशाभवंतित्रयइमेलोकाएषांलोकानामाप्त्याउत्तरउत्तरोज्यायान्भवतीतीमउत्तरमुत्तरमेवज्यायांसंकरोतिसर्वेषामभि
गमयन्नवद्यतीतिसोवद्यन्नाहेंद्रायराज्ञेनुब्रूहीतिप्राच्यांदिशित्वमिंद्रासिराजेत्यन्वाहेंद्रोजयातिनपराजयाताइतियजतिसोवद्यन्नाहेंद्रायाधिराजाया
नुब्रूहीतींद्रोजयातिनपराजयाताइत्यन्वाहेंद्रस्यदेवप्ररिरिचेमहित्वमितियजतिसोवद्यन्नाहेंद्रायस्वराज्ञेनुब्रूहीत्यथास्येंद्रस्यप्ररिरिचेमहित्वमित्यन्वा
ह्यप्राच्यांदिशित्वमिंद्रासिराजेतियजतित्र्यन्यासमन्वाहैनिर्दोहायेतिब्राह्मणंयइंद्रियकामः॥२८॥चतुर्दश॥यइंद्रियकामोवीर्यकामःस्यात्तमेतया
सर्वपृष्ठयायाजयेदित्येतयेष्ट्यायक्ष्यमाणउपकल्पयतेश्वमृषभंवृष्णिंबस्तमित्यथदेवस्यत्वासवितुःप्रसवइतिप्रतिपदंकृत्वेंद्रायराथंतरायजुष्टंनिर्वपामीति
चतुरोमुष्टीन्गार्हपत्याग्निर्वपत्येतामेवप्रतिपदंकृत्वेंद्रायबार्हतायेंद्रायवैरूपायेंद्रायवैराजायेंद्रायशाक्वरायेंद्रायरैवतायेतिचतुरश्चतुरोमुष्टीनेकैक
स्यैदेवतायैहविष्कृतावाचंविसृजतेसमानंकर्माधिवपनाद्ध्युप्यगार्हपत्येद्वादशतानानिकपालान्युपदधात्यथवैभवत्स्त्रीनेषुकपालेष्वधिश्रयत्ययात

Indira Gandhi National
Centre for the Arts

यामन्वायद्वादशकपालः पुरोडाशो भवति वैश्वदेवश्चरुः स यत्समंतं पर्यवद्यतीति सोऽवद्यन्नाहेंद्रायरथंतरायानुब्रूहीत्यभि त्वा शूर नोनुम इत्यनूच्यत्वामिद्धि हवाम
ह इति यजति सोऽवद्यन्नाहेंद्राय बार्हताय अनुब्रूहीति त्वामिद्धि हवामह इत्यनूच्य यच्चिद्धि हवामह इति यजति सोऽवद्यन्नाहेंद्राय वैरूपायानुब्रूहीति यद्याव इंद्र ते शत इत्य
नूच्य पिबा सोममिंद्र मंदतु त्वेति यजति सोऽवद्यन्नाहेंद्राय वैराजायानुब्रूहीति पिबा सोममिंद्र मंदतु त्वेत्यनूच्य कदाचन स्तरीरसीति यजति सोऽवद्यन्नाहेंद्रा
य शाक्वरायानुब्रूहीति कदाचन स्तरीरसीत्यनूच्य रेवतीर्नः सधमाद इति यजति सोऽवद्यन्नाहेंद्राय रैवतायानुब्रूहीति रेवतीर्नः सधमाद इत्यनूच्याभि त्वा शूर
नोनुम इति यजति व्यस्या समन्वाहार्यं निर्वपेदिति तस्याप्येतमन्वाहार्यमासाद्य ॥ २९ ॥ अन्वाहार्यमासाद्याश्वमृषभं वा दक्षिणं वस्तमिति दद्यात् एतेनैव यजेताभिचर्य
माण इति यो वै पर्याप्स्यतीति यश्च क्षुत्कामः स्यात्तस्माएतामिष्टिं निर्वपेदग्नये भ्राजस्वते पुरोडाशमष्टाकपालं सौर्यं चरुमग्नये भ्राजस्वते पुरोडाशमष्टाकपाल
मिति तस्याएताभवं स्फ उदग्नेषु चयस्त्वविज्योतिषा दुर्यं चित्रमुदग्नेषु चयस्त्वविज्योतिषेत्यपकृताया मिडायामन्वाहितमग्नीधे भवत्यथ यजमानाय त्रीन्
पिंडान्प्रयच्छत्युदु त्यं जातवेदसं सप्त त्वा हरितो रथे चित्रं देवानामुदगादनीकमिति पिंडान्प्रयच्छति चक्षुरे वास्मिन्प्रयच्छति यद्देवत्यस्तदिति ब्राह्मणं वै
श्वदेवीं सांग्रहणीं निर्वपेद्ग्रामकाम इति वैश्वदेवं चरुं संग्रहणं तद्वश्चपर्यस्य ध्रुवोऽसि ध्रुवोऽहं सजातेषु भूयासमिति परिधीन्परिदधाति तस्याएतेऽभ
वतो विश्वेदेवा विश्वेदेवा इति पुरस्तात्स्विष्टकृतः स्वाकृती जोषा यामनमस्या मनस्यदेवा इति तिस्रः ॥ ३० ॥ पंचदशः ॥ अथ यो वै भवत्यग्नेर्वा एतस्य शरीरं ग
च्छति सोमं रसो वरुण एनं वरुणपाशेन गृह्णाति सरस्वतीं वागग्नाविष्णू आत्मा यस्य ज्योगामयति यो ज्योगामयावी स्याद्यो वा कामयेत सर्वमायुरियामिति तस्मा

एतामिष्टिं निर्वपेदित्येतयेष्ट्यायक्ष्यमाण उपकल्पयते खादिरं नवं पात्रं नवनीतमाज्यं यावतीः समा एष्यन्मन्येत तावन्मानं च प्रवर्तमथ देवस्य त्वा सवितुः प्रसव
इति प्रदिपदं कृत्वाग्नेयमष्टाकपालं निर्वपति सौम्यं चरुं वारुणं दशकपालं सारस्वतं चरुमाग्नावैष्णवमेकादशकपालमिति समानं कर्मा इडाया वेक्षणात्स आ
ज्यमवेक्षमाणामनुवर्तयति यन्नवमैत्तन्नवनीतमभवदिति समानं कर्मा स्रुचां संमार्जनात्सादयित्वा स्रुचौ येनैनं प्रवर्तेन खादिरे नवे पात्रे उपस्तीर्णाभिघारितं सहह
विर्भिरंतर्वेद्यासादयति तस्याएताभवंत्यायुष्ट आयुर्दा अग्न आप्यायस्व सं ते वतेत्ते उदुत्तमं प्रणो देव्या नो दिव्यो ग्नाविष्णू अग्नाविष्णू इत्यथ पुरस्तात्स्विष्टकृतः
स्वाकृती रूपकृतौ त्विश्विनोः प्राणोऽसि ॥ ३१ ॥ अश्विनोः प्राणोऽसि तस्य ते ददातु ययोः प्राणोऽसि स्वाहेंद्रस्य प्राणोऽसि तस्य ते ददातु यस्य प्राणोऽसि स्वाहा मित्रावरुण
योः प्राणोऽसि तस्य ते ददातु ययोः प्राणोऽसि स्वाहा विश्वेषां देवानां प्राणोऽसि तस्य ते ददातु येषां प्राणोऽसि स्वाहेति कृत्वा कुत्वेव संस्रावैः प्रवर्तमभिघारयतीडऽसिवि
डऽसि संभ्राडसि स्वराडसीत्यथैतं प्रवर्तमग्रेणाहवनीयं पर्याहृत्य दक्षिणतो निदधात्यथ यजमानमाज्यमवेक्षयति घृतस्य धारामम् तस्य पंथामिंद्रेपाद
त्तां प्रयतां मरुद्भिः ॥ तत्त्वा विष्णुः पर्यपश्यत्तत्त्वेडा गव्यैरयदित्यथ ब्रह्मणो हरतमन्वारभ्य पर्याकुः पावमानेन त्वा स्तोमेन गायत्रस्य वर्तन्योपांशोर्वीर्येण देवस्त्वा
सविताोत्सृजतु जीवातवे जीवनस्यायै बृहद्रथंतरयोस्त्वा स्तोमेन त्रिष्टुभो वर्तन्या शुक्रस्य वीर्येण देवस्त्वा सविताोत्सृजतु जीवातवे जीवनस्याया अग्नेस्त्वा मात्र
या जगत्यै वर्तन्याग्रयणस्य वीर्येण देवस्त्वा सविताोत्सृजतु जीवातवे जीवनस्यायाइत्यथ हिरण्य हुतं निष्पिबति निष्पिबंतमनुमंत्रयत इममग्न आयुषे वर्चसे कृ
धि प्रियं रेतो वरुण सोम राजन् ॥ मातेवास्मा अदिते शर्म यच्छ विश्वेदेवा जरदष्टिर्यथा सदित्यथैनं प्रवर्तमद्भिः प्रोक्ष्यास्य दक्षिणे कर्ण आबध्नीत आयुष्टे वि



Indira Gandhi National Centre for the Arts

बौ०क०सू० १२८

श्वतोदधर्स्य सव्यं प्रेथेनं प्रवर्तमनुपरिवर्तयत अयुरसि विश्वायुरसि सर्वायुरसि सर्वमायुरसी त्यथास्य ब्राह्मणहस्तं गृह्णात्यग्निरायुष्मानित्यांतास्यनुवाकस्य यावकाम्ये०
तोश्वान्प्रतिगृह्णीयात् ॥ ३२ ॥ यावतोश्वान्प्रतिगृह्णीयात्तावतो वारुणांश्चतुष्कपालान्निर्वपेदेकातिरिक्तानिति तस्याएते भवत इमं मे वरुण तत्त्वायामीति यद्यपरं प्र
तिग्राही स्यात्सौर्यमेककपालमनुनिर्वपेदिति तस्याएते भवत उदुत्यं चित्रमित्यथापो वभृथमवैत्यथ नप्त्रीयं चरुं पुनरेत्य निर्वपेदिति तस्याएते भवतोऽपान्नं
पात्समन्यायंतीति यः पापयक्ष्मगृहीतस्माएतामिंद्रावरुणीं पयस्यान्निर्वपेदित्येतयेष्ट्या यक्ष्यमाण उपकल्पयते दधि पय आमिक्षा याइत्यथ देवस्य त्वा सवितुः
प्रसव इति प्रतिपद्य कृत्वेंद्रावरुणाभ्यां जुष्टं निर्वपामीति चतुरो मुष्टीन्व्रीहीणां निर्वपति हविष्कृतावाचं विसृजन्तं समानं कर्माधिवपनाद्ध्युष्य दक्षिणार्धे गा
र्हपत्यस्यैकादशकपालान्युपदधातीयं देतं पुरोडाशमधिश्रयत्यक्तितं दे तामामिक्षां गार्हपत्येश्रपयत्यथैतं पुरोडाशमुपस्तीर्णाभिघारितमुद्वास्यामिक्षया
संछाद्यातर्वेद्यासादयत्यथ वै भवति पयस्यां ॥ ३३ ॥ अथ वै भवति पयस्यां पुरोडाशमवदधात्या सर्वं तमेवैनं करोत्यथो आयतनवंतमेव चतुर्धा व्यूहति दि
क्ष्वेव प्रतितिष्ठति पुनः समूहतीति स आमिक्षां पुरोडाशं कृत्वा व्यूहति या वामिंद्रावरुणा यतव्या तनूस्तयेवमं हसो मुंचतं या वामिंद्रावरुणा सहस्या तनू
स्तयेममं हरसस्यात्तेजस्या तनू० सोमुंचतमिति पुनः समूहति समूह्यावद्यतीति तस्याएते भवत इंद्रावरुणयोरहमिंद्रावरुणा युवमध्वरायन इत्यथ पुरस्ता
त्स्विष्टकृतः स्रुवाहुतीरुपजुहोति यो वामिंद्रावरुणाग्नौ स्रामस्तं यामेतेनाव यज इत्यपेष्टो ॥ ३४ ॥ सप्तदश ॥ अथ वै भवति यो भ्रातृव्यवान्स्यात्स स्पर्धमान एत १२८
तयेष्ट्या यजेताग्नये प्रवते पुरोडाशमष्टाकपालं निर्वपेदग्नये विबाधवतेग्नये प्रतीकवत इति तस्याएते भवंति प्रप्रायमग्निः प्रतेयक्षि प्रत इयर्मि मन्म भुवो विपाज

सा विज्योतिषा सत्वमग्ने प्रतीकेन तं स्म प्रतीकं स्म दहताः संचमिति यो भ्रातृव्यवान्स्यात्स स्पर्धमान एतयेष्ट्या यजेतेंद्राया हो मुचे पुरोडाशमेकादशकपा
लं निर्वपेदिंद्राय वैम्रधायेंद्रायेंद्रियावत इत्यथ वै भवति त्रयस्त्रिंशत्कपालं पुरोडाशं निर्वपतीति यएवैते त्रय एकादशकपालास्तएवोक्ता भवंति तस्याएताभ
वंत्यं हो मुचे वि वि षयन्मा यिन इंद्र क्षत्रमिंद्रियाणि शतक्रतोनु ते दायीति यो भ्रातृव्यवान्स्यात्स स्पर्धमान एतयेष्ट्या यजेताग्नये संवर्गाय पुरोडाशमष्टाक
पालं निर्वपेत्तं शृतमासन्नमेतेनयजुषाभिमन्त्रयेदिति तमासन्नमेतेनयजुषाभिमन्त्रयेत ओजोसि सहोसि बलमसि भ्राजोसि देवानां धामनामासि विश्वमसि वि
श्वायुः सर्वमसि सर्वायुरभिभूरहमनेन हविषामुं भ्रातृव्यमभिभूयासमितियुक्थाह्निर्देवहूतमानित्यस्यानुवाकस्य सप्तदशसामिधेनीः परान्वीरन्वाहु तस्याएतेभ
वतः सखायः सवः सम्यंचं सं समिद्युवसेवृषन्निति यः प्रजाकामस्यात् ॥ ३५ ॥ यः प्रजाकामः स्यात्तस्माएतं प्राजापत्यं गार्मुतं चरुं निर्वपेदिति तस्याएतेभवतः प्रजा
पते संवेदितियः पशुकामः स्यात्तस्माएतं सोमापौष्णं गार्मुतं चरुं निर्वपेदिति तस्याएतेभवतः सोमापूषणेमौ देवावितित्रिचित्रयायजेत पशुकाम इति श्वश्चित्रेत्स्क पवस
त्यथ प्रातराग्नेयमष्टाकपालं निर्वपति सौम्यं चरुं त्वाष्ट्रमष्टाकपालं सरस्वत्यै चरुं सरस्वते चरुं सिनीवाल्यै चरुमैंद्रमेकादशकपालमिति तस्याएताभवंत्यग्निनार
यिमश्नवत्सोमाः अग्न आप्यायस्व संत इह त्वष्टारमग्रियं तन्नस्तुरीपं प्रणोदेव्यानोदिवः पीपिवांसः सरस्वतस्तनं येते सरस्वऊर्मयः सिनीवालि या सुपाणिरिंद्रं वो
विश्वतस्परींद्रं नर इत्यथ पुरस्तात्स्विष्टकृतः स्रुवाकुतीरुपजुहोत्यग्ने गोभिर्न आगहीति पंचचैतेचैंद्रियजुषी ॥ ३६ ॥ अष्टादश ॥ कारीर्या यक्ष्यमाणो भवत इति स उपक
ल्पयते कृष्णं वासः कृष्णतर्पं कृष्णमश्वं कृष्णं सारानं कृष्णाजिनं कृष्णं मधु कारीरसक्तून्कृष्णीं कुंभीमामपात्रं करीयां कृष्णमनस्त्रिगंधं कृष्णामर्दिं कृष्णं वर्षाकुस्तं

Indira Gandhi National Centre for the Arts

बंवेतसमिध्मावर्हिरित्यथयजमानायतने कृष्णंवासः कृष्णतूषंनिदधात्यग्रेणाहवनीयं कृष्णमश्वं कृष्णेन संदानेन समस्यस्यंतर्वेद्यां कृष्णाजिने कृष्णमधुकरीर
सक्तून्निवपन्फलकरं कुंभीं निमितोत्यग्रेणोत्करं प्रागीषमनस्थापयित्वा तस्याग्रेणोपकंभनं कृष्णामाविं निग्रथ्नात्युत्तरेणाहवनीयं कृष्णंवर्षाउस्तंबंवेतसमिध्माव
र्हिरितिनिदधात्यथयजमानः कृष्णंवासः कृष्णतूषंपरिधत्ते मारुतमसि॥ ३७॥ मारुतमसिमरुतामोजोपांधारांभिंधीतिवारमयतमरुतः श्येनमायिनमितिपश्चा
द्वातंप्रतिमीवतिपुरोवातमेवजनयतिवर्षस्यावरुध्याइतिब्राह्मणमथैतमश्वं संदानंप्रमुच्योत्तरवेर्गेनाभिविक्षिपत्यभिक्रंदस्तनयगर्भमाधाइतिसयदिविधूनु
तेयदिमेहतियदिशकृत्करोतिवर्षिष्यतीत्येवंवेदाथाविमभिजुहोत्यसुरा असिप्रथमजाबलमसिसमुद्रियमितिसावदिविधूनुतेयदिमेहतियदिशकृत्करोतिव
र्षिष्यतीत्येवंवेदाथवातनामानि जुहोतिपुरोवातोवर्षन्नजिन्वरावृत्स्वाहेत्यष्टावथांतर्वेदिकृष्णाजिनेमधुषाकरीरसक्तून्संयौतिमांदावाशाः शुंध्यूरजिराः॥ ज्यो
तिष्मतीस्तमस्वरीरुंदतीः सुफेनाः॥ मित्रभृतः क्षत्रभृतः सुराष्ट्रा इहमावतेतिचतस्रः पिंडीः कृत्वासमुच्छ्रित्यकृष्णाजिनस्यांतानत्संदानेनोपनह्यतिवृष्णो अश्वस्य
संदानमसिवृष्ट्यैत्वोपनह्यामीत्यथैना अनसः प्रथमायांगंधायामाबध्नातिदेवावसव्याः॥ ३८॥ एकोनविंशतिः॥ देवसव्या अग्नेसोमसूर्येत्यहोरात्रे उपरमतिद्वि
तीयस्यामाबध्नातिदेवाः शर्मण्यामित्रावरुणार्यमन्नित्यहोरात्रेण्वोपरमेत्यथवेभवतियदिवर्षेतावत्येवहोतव्यमितियदिचेवनवर्षतियदितोभयेवापंजीजेहोति
स्रुवेणोपस्तीर्णाभिघारिताइतिदिवाचित्तमः कृण्वंत्यापंनरमुदीरयथा×३मतितृतीयस्यामाबध्नातिदेवाः सपीतयोपांनपादाशुहेमन्नित्यहोरात्रेण्वोपर××मरुतः
समुद्रथइतियासांधूममन्वीक्षतेऽसितवर्णाहरयः सुपर्णाइतियदिनवर्षेश्वोभूतेहविर्निर्वपेदग्नयेधामच्छदेपुरोडाशमष्टाकपालं निर्वपेन्मारुतं सप्तकपालं

सौर्यमेककपालमितितस्याएताभवंतत्याचिदन्युतान्नेभूरिणितवजातवेदोदिवोनोवृष्टिंमरुतोररीध्वंपिन्वंत्यपोमरुतः सुदानवोऽनदुत्संचित्रमित्यथपुरस्तात्स्वि
ष्टकृतः स्रुवाहुतीरुपजुहोत्योर्वभृगुवच्छुचिमप्नवानवदितितिस्रोथैतांकुंभीमद्भिः पूरयन्तिसृजावृष्टिंदिवआद्भिः समुद्रंपृणेतिसायदीर्यतयदिभिद्यतेवर्षिष्य
तीत्येवंवेदाथमंथ्याउपरिजुहोत्यउन्नाअसीतिसायदिविधूनुतेयदिमेहतियदिशकृत्करोतिवर्षिष्यतीत्येवंवेदाथवर्षाकुस्तंबमभिजुहोत्युन्नंभय॥ ३९॥ उन्नं
भयपृथिवींभिंधीदंदिव्यंनभः॥ उद्नोदिव्यस्यानोदेहीशानोविसृजादृतिमित्यनमाहवनीयेनुप्रहरतिहिरण्यकेशोरजसोविसारइत्यथास्यधूममन्वीक्षतआतेसु
पर्णा अमिनंतं एवैरित्यर्थांतर्वेदितिष्ठन्कृष्णाजिनंवधूनोतियदेवादिविभागाइत्येतादनुवाकस्याः पंचदशसामिधेन्यः पंचप्रयाजाआवार्त्रघ्नावाज्यभागावथहवि
षोग्निर्मूर्धाभुवइतित्रिष्टुभौसंयाज्येयाभिश्चैवर्वापिंडीराबध्नातियाभिश्वजुहोतियाभ्यांचधूममन्वीक्षतेतोः सिध्यतिसंतिष्ठतेतजः सवकारीरी॥ ४०॥ विंशतिः॥ अ
थर्वेभवतित्रेधातवीयेनयजेताभिचरन्वाभिचर्यमाणोवासहस्रेणयक्ष्यमाणः सहस्रेणेजानोयोयक्ष्यइत्युक्त्वानयजतइत्येतयेष्ट्यायक्ष्यमाणउपकल्पतेयसह
स्रंहिरण्यंताण्यंधेनुमित्यथदेवस्यत्वासवितुः प्रसवइतिप्रतिपदंकृत्वेंद्राविष्णुभ्यां जुष्टंनिर्वपामीतिचतुरोमुष्टीन्व्रीहीणांनिर्वपत्येतमेवप्रतिपदंकृत्वेंद्राविष्णुभ्यांनि
र्वपामीतिचतुरोयवानामेतामेवप्रतिपदंकृत्वेंद्राविष्णुभ्यां जुष्टंनिर्वपामीतिचतुरएवव्रीहीणांतेषांव्रीहिष्वेवहविष्कृतमुद्वयत्यपोघ्नंतेयवान्हविष्कृतावावंविसृ
जतिसमानंकर्माधिवपनादभ्युप्यगार्हपत्येद्वादशकपालान्युपदधात्यर्थंवैभवतिद्वादशकपालः पुरोडाशोभवतितत्रयश्चतुष्कपालास्त्रिष्षमस्वसत्वात्रयः पुरोडा
शाभवंतित्रयइमेलोकाएषांलोकानामाप्त्याउत्तरउत्तरोज्यायान्भवतितीउत्तरमुत्तरमेवज्यासंकरोतियवमयोमध्येयर्थवेभवतिसर्वाणिछंदांसि॥ ४१॥ सर्वा

Indira Gandhi National Centre for the Arts

बौ०क०सू० १३० णिछंदांस्यतस्यामिस्यामन्त्यानीत्याकृस्त्रिष्टुभोवाएतद्वीर्ययत्ककुदुष्णिहाजगत्यैयदुष्णिहककुभावन्वाहतेनैवसर्वाणिछंदांस्यवरुंधइतिप्रसोअग्नेतवो काम्ये०
तिभिरित्येतार्भाद्वैधायाग्लोकेहृथास्यग्नेत्रीतिवाजिनात्रीषधस्थेतित्रिवत्यापरिदधातिसरूपत्वायेतिब्राह्मणं सर्वेषामभिगमयन्नवद्यतीतितस्याएतेभवतः संवां
कर्मणाभाजिग्युथुरित्यन्वाहार्यमासाद्यसहस्रं हिरण्यंतार्प्यंधेनुमितिददाति॥४२॥ ॥इतिबौधायनकल्पसूत्रेकाम्येष्टीप्रकरणं॥ ७ ॥ श्रीरस्तु॥ ॥
अथबौधायनकल्पसूत्रेवाजसनीयप्रारंभः॥ ॥वाजपेयेनयक्ष्यमाणोभवतिसउपकल्पयतेकृष्णाजिनंरुक्मवर्णराजतोरुक्मोबस्ताजिनं शतमानं हिरण्मयं
सप्तदशसौवर्णानिरुक्मकानिहिरण्यपात्रंमध्वः पूर्णमौदुंबरं रथचक्रं सप्तदशफलकं चमीतिर्यूपंचतूपरं चतुरश्रिं सप्तदशारत्निं गोधूमकलापीमुल्मी
षन्नैयारं सप्तदशशारावं सप्तदशनिष्कान्सप्तदशवसनानिसप्तदशवासोभारान्सप्तदशरथान्सप्तदशदुंदुभीन्सप्तदशहस्तिनः सप्तदशदा
स्यः सप्तदशोष्ट्रानां सियुक्तानिसप्तदशगवां शतानिवयसोवयसोवासप्तदशसहस्रंवातस्मिन्हि सर्वाणिवयांसिभवंतिचतुर्विंशतिपशूनेकपंचाशत्
तमश्वान्रथादिरिवित्तणांबध्नीयुस्तांप्रज्ञाता अग्निष्टोमिकाः संभाराः संगृहीतस्यजघन्याहः सुपुरस्ताद्दर्शपूर्णमास्येदीक्षतेतस्यत्रयोदशदीक्षाः
सर स्तिस्रउपसदःसप्तदशप्रसुतोपिवासप्तदशैवदीक्षास्तिस्रउपसदएकविंशत्यांप्रसुतोपिवातिस्रएवदीक्षास्तिस्रउपसदःसप्तम्यांप्रसुतः॥१॥अथयदिभव
तिसावित्रंजुहोतिकर्मणः कर्मणःपुरस्तादितिदीक्षणीयायांनिर्वप्स्यन्त्सावित्रंजुहोतिदेवसवितः प्रसुवयज्ञंप्रसुवयज्ञपतिंभगायदिव्योगंधर्वः॥केतपूः १३०
केतंनः पुनातुवाचस्पतिर्वाचमद्यस्वदातिनः स्वाहेतिदीक्षाहुतीर्होष्यन्त्सावित्रंजुहोतिप्रायणीयांनिर्वप्स्यन्त्सावित्रंजुहोत्यंतर्हिरण्यां होष्यन्त्सावि

त्रंजुहोतिपदेनचरतिपदेनचरित्वाराजानंक्रीत्वोद्यास्यातिथ्यंनिर्वप्स्यन्त्सावित्रंजुहोतिप्रथमाभ्यांप्रवर्ग्योपसद्भ्यांप्रचरिष्यन्त्सावित्रंजुहोत्येतस्मिन्कालेप्र
तिप्रस्थातादक्षिणेशालाखंडेऽवटंखानयित्वावाजपेययूपाय संदधातिमहावेदिंपूर्वेपरिग्राह्यंपरिगृहीष्यन्त्सावित्रंजुहोत्याहवनीयंप्रणेष्यन्त्सावित्रं
जुहोतिरथवाहनेसहोहविर्धानेसंप्रेष्यन्त्सावित्रंजुहोत्यग्नीषोमौप्रणेष्यन्त्सावित्रंजुहोतीतिदशांतः शालामण्होषीदथातआग्नीध्रएवहोष्यतियूपमु
च्छ्रयिष्यन्त्सावित्रंजुहोतियदाध्वर्युश्चयजमानश्चपुरस्तात्प्रत्यंचावाजसाववसर्पतोथप्रतिप्रस्थातापश्चात्प्राङुःसोभिवेष्टयानःसंपेस्फदीचीनदशौबावि
ग्रथ्नातिधनुर्वेष्टितंवाप्रवेशायत्येतस्मिन्कालेप्रतिप्रस्थातागोधूमकलापीमुभयतःसमांकृत्वाद्यमीषेणविग्रथ्नातितस्यांतद्वेष्टितियज्ञषालेस्वर्वेतंयूपमुत्स
ज्याग्नीषोमीयंपशुमुपाकरिष्यन्त्सावित्रंजुहोतितस्यप्रसिद्धंवपयाचरित्वावसतीवरीर्ग्रहीष्यन्त्सावित्रंजुहोतिपशुपुरोडाशंनिर्वप्स्यन्त्सावित्रंजुहोत्य
नुसवनंत्रीणिसावित्राणितानिसप्तदशापिवासवनेसवनएवजुहुयादित्येतदपरमथपशुपुरोडाशंनिर्वपतितमनुवर्तंतेष्टौदेवसूवां हवींष्यग्नयेगृहप
तयइत्येतानितेषामुक्तंचरणंयथाग्नेर्विधायमिश्रांताः पुरोडाशाः संतिष्ठंतेपत्नीसंयाजांतः पशुर्हृदयशूलांतइत्येकेअंतेतांदुंदुभीनन्नदिन्नामासंजमतिपंच
दक्षिणायां श्रोण्यांपंचोत्तरस्यांचतुरोदक्षिणेंसत्रानुत्तरे सथास्येदिग्भ्योवाचमवरुंधतइतिहस्माहबौधायनोग्रेणाग्नीध्रंगुल्मकृता आसन्कास्युरित्यां
जीर्गविरभितः सदसइतिकान्योथवसतीवरीः परिहृत्यपयांसिविशिष्यापवसति॥२॥अथातोमहारात्रएवबुध्यंतेप्रातराज्यानिगृहीत्वाराजानमुपावहृत्य
प्रातरनुवाकमुपाकरोतिपरिहितेप्रातरनुवाकेऽपोंछ्यपाध्वर्युरभिद्रवत्येतस्मिन्कालेवाजपेयस्फरां संपवय्यस्फरास्वयमादायदक्षिणयाद्वारापनिर्हृत्यदक्षि

Indira Gandhi National
Centre for the Arts

पोनसदः परीत्यमार्जालीयंधिष्ण्यमिर्यपर्याहृत्यापरयाद्वाराहविर्धानंप्रपाद्यदक्षिणस्यहविर्धानस्यपश्चाद्दक्षमुपसादयत्यथाध्वर्युरद्भिरुदेतिसर्वानक्तनु
येतिप्रसिद्धोभिषवः प्रसिद्धंग्रहाग्रहणंतेसमानंकर्माग्रयणाद्धाराग्रयणंग्रहंगृहीत्वापंचैंद्रानतिग्राह्यान्गृह्णीत्वाक्षपयामगृहीतोसिन्द्रषदंत्वाद्युषदमि
त्येताभिः पंचभिरथैनांदक्षिणार्धेपूर्वार्धेखरस्यगुल्मकृतान्सादयतियावदेवत्राध्वर्युश्चेष्टतितावदेवप्रतिप्रस्थातामतउदीचीनदशेनवालेनसुरांपुनाति
पुनातुतेपरिस्रुतंसोमंसूर्यस्यदुहिता॥वारेणशश्वतातनेतिवायव्यमेवाध्वर्युरादत्तउपयामंप्रतिप्रस्थाताध्वर्युः पूर्वोवायव्येनद्रोणकलशात्सोमग्रहान्गृ
ह्णात्ययाविप्राजनयन्कर्वराणीत्यनुद्रुत्योपयामगृहीतोसिप्रजापतयेत्वाजुष्टंगृह्णामीतिपरिमृज्यसादयत्येषतेयोनिः प्रजापतयेत्वेत्यथप्रतिप्रस्थातापया
मेनसताःसुराग्रहान्गृह्णातिकुविदंगयवमंतइत्यनुद्रुत्योपयामगृहीतोसिप्रजापतयेत्वाजुष्टंगृह्णामीतिदर्भैः परिमृज्यप्रजापतयेत्वेतिसादयतिनैवजुष्टं
करोतिनैवयोनितांचेवमेवव्यतिषंगृह्णीतः सप्तदशोतरः सप्तदशोतरः पुरोक्षमेवाध्वर्युः सोमग्रहान्धिश्रोणिवात्रिःश्रेणिवोदीचआयातयत्यथषोडशिनंगृ
ह्णात्यातिष्ठवृत्रहन्रथमित्यनुद्रुत्योपयामगृहीतोसीन्द्रायत्वाषोडशिनेजुष्टंगृह्णामीतिपरिमृज्यसादयत्येषतेयोनिरिंद्रायत्वाषोडशिनइत्यथैवाध्र्यंगृह्णाति
समानंकर्माश्विनाद्धाराश्विनंगृहीत्वाषड्रशनाआदाययूपमभ्येतिस्वर्वंतंयूपमुत्सृज्याथैनान्पशूनुपाकरोत्याग्नेयमैंद्राग्नमैंद्रंमारुतींगोवंशांसप्तदशप्राजा
पत्यांछ्याभानेकरूपानसारस्वतीमेंततोऽथनिर्मथ्यस्याग्नतानिर्मथ्येनचरतिप्रहत्याभिकृत्याथैतान्नानादेवत्यान्पशून्पृथक्पृथक्द्विगुणाभिरभिधाय
पृथक्त्रिगुणासुनियुनक्त्यथैतान्त्समानदेवत्यान्पशून्द्विगुणाभिरभिधायैकस्यांपृथ्व्यांनियुनक्त्यपिवापत्नीपशुंप्रतिसजतिसारस्वतीमेंततोनुनियुज्या 

थैनान्प्रोक्ष्यानिपाय्योपाक्ष्योदृक्पप्रोक्षणीधानं॥३॥अथेध्मात्समिधमाधायदधान आहाग्नयेसमिध्यमानायानुब्रूह्येभ्यादध्यातीध्मंपरिसमिधंशिनष्टि
वेदेनोपवाजयन्यनूक्तासुसामिधेनीषुस्रुवेणाघारमाघारयतिसंमृष्टेस्रुग्भ्यामुत्तरमथासंस्पर्शयन्स्रुचावुदङ्ङत्याक्रम्यजुह्वापशून्समज्यसादयित्वा
स्रुचावध्वरंप्रवृणीतेप्रसिद्धमृत्विजोवृणीतेसीदहोताप्रसवमाकांक्षीतिप्रसूतः स्रुचावादायात्याक्रम्याश्राव्याहसमिद्धःप्रेष्येतिवषट्कृतेजुहोतिप्रेष्यप्रे
ष्येतिचतुर्थाष्टमयोःसमानयमानोष्टमेसर्वंसमानयतेपरिस्वाहाकृतीभ्यः संस्रावंशिनष्टिदशप्रयाजानिष्ट्वोदङ्ङत्याक्रम्यस्वरुशासैः पशूनत्समनक्तित
एतेनानादेवत्याःपशवःसमानस्वरवोनानाशासाः समानंकर्मापर्यग्निकरणात्स्थपर्यग्निकृतेः पशुभिरुदंचः प्रपद्यंततेषांसारस्वत्स्फत्तराध्योभवसाग्नियदु
पचरत आग्नेयमेवाध्वर्युर्वपाश्रपणीभ्यामन्वारभंतेपृथगितरान्परिकर्मिणाउदंचोनयंत्यनुपूर्वमव्यतिषजंत आग्नेयायैवाध्वर्युः पशवेनिहन्यमानायबर्हि
रूपास्यतिपृथगितरेभ्यस्ततउतराश्राचीवोदीचीवानिघ्नत्यस्मिन्यज्ञेविश्वविदोघृताच्यग्निंकुलायमभिसंवसानाअस्मांअवंतुपयासाघृतेनेतिसंज्ञप्ता
न्प्राहुर्जुहोतिसंज्ञप्ताकृतियत्स्त्रावामायूनरूपंतत्यथाभ्येतिशामितारउपेतनेतिपात्नीभ्यः प्रमुच्यमानाननुमंत्रयतेऽदितिःपाशान्प्रमुमोक्त्वेतानितिपृथगधि
शाखाभिरूपसज्येमांदिक्षोनिरस्यत्यरातीयंतमधरंकरोमियंद्विष्मस्तस्मिन्प्रतिमुंचामिपाशानिति॥४॥अथप्रतिप्रस्थातापत्नीमुदानयत्यस्यदककमंडकुमु
थाप्यसानुपूर्व्यंपशूनांप्राणानाप्यायन्त्यन्वगध्वर्युर्वपाउभ्यरत्याग्नेयस्यैवाध्वर्युर्वपयाप्रथमयाप्रतिपद्यंतेन्वीरितराआहरत्याग्नेयस्यैववपायैप्रतितप्यमा
नायैबर्हिषोग्रमुपास्यत्यपेतरायच्छत्याग्नेयस्यैववपास्रुवाकृत्वाभिजुहोत्यपतरायच्छत्यथस्वाहाकृतिंप्रेषेणाचरित्वासंस्रावेणपृषदाज्यमभिघार्याग्नेय

Indira Gandhi National
Centre for the Arts

बौ० क० सू०
१३२

स्यैववपामभिघारयत्यथेतरायच्छंस्यथपुरस्तात्स्वाहाकृतिंस्रुवाकुतिंकृत्वाऽथैतस्यांनानादेवत्यानांपशूनांमुख्यस्यवपांसमवत्तंपन्नाद्धाप्रजापतयइ वाज०
त्यपांशुष्छागानांवपानांमेदसोवदीयमानानामनुब्रूहीत्यथाश्रावयति।कस्याभवंत्यथेतराःपात्र्यांविदस्नुनेनवोपांशुच्छंतद्विरभिघारयत्यथाक्रम्याश्राव्या
हप्रजापतयइन्द्रत्यपांशुष्छागानांवपामेदःप्रस्थितंप्रेष्येत्यथाश्चैर्वषट्कृतेजुहोत्यथांशुसारस्वत्यैववपयाचरत्यथोपरिष्टात्स्वाहाकृतिंस्रुवाकृतिंकृत्वाव
पात्रपणीरनुप्रहृत्यसमुत्क्रम्यचात्वालेमार्जयंतेऽथपश्चान्विज्ञास्तिज्ञामितरिख्याहृयन्मारुत्याअनवदानीयंतदप्यन्हाघ्रपयतादिसयसावित्रंकृत्वा
प्रसर्पतिप्रातःसवनायतदृजुधासंतिष्ठते॥५॥अथसावित्रंकृत्वाप्रसर्पतिमाध्यंदिनायसवनायदेवाद्वाराविन्यतएवोर्ध्वेनसप्रसत्पान्दिदिश्वाध्वर्युप्राङ
यन्ताहूचत्वालेरथन्चक्रंमिनिनुतरथवाहनेरथमाधताश्वान्पल्पूलयनेयद्वास्यन्तसितद्दक्षिणतउपस्थापयाभियोतारएत – यतश्चावस्तुतमेहियजमाने
तिप्रासिध्योभिषवःप्रसिध्यंग्रहगस्यंतेसमानंकर्माग्रयणाद्धाराग्रयणंगृहीत्वाषोडशिनमभिगृह्णातीन्द्रमिध्वरीवहृतइत्यनुद्रुत्योपयामगृहीतोसीन्द्रायत्वा
षोडशिनेजुष्टंगृह्णामीतिपरिमृज्यसादयत्येषतेयोनिरिन्द्रायत्वाषोडशिनइत्यथोक्थ्यंगृह्णातिसमानंकर्मादक्षिणेभ्यांदाक्षिणानिहोष्यन्याचत्वाज्यरथ
रीःससुवांस्त्राचंवासस्तस्यैतस्यवसनस्यांतिमायांदशायांनिष्करज्जुप्रग्रथिताभवत्यैतत्समादायेहियजमानायेहियजमानेत्युत्तरेणाग्नीध्रीयंप
रीत्योत्तरेणसदःपरीत्याग्रेणश्चात्वातिष्ठंतेप्रतिप्रस्थात्रएतानिवास्त्राणिप्रयच्छत्यथाहेहियजमानेतिरथएषदक्षिणोश्वोण्यंतेरथयाहनआहितोभवति १३२
तमुपावहरंतीन्द्रस्यवज्रोसिवार्त्रघ्नस्त्वयायंवृत्रंवध्यादित्यथैनंगृहीतमंतर्वेद्यभ्यववर्तयंतिवाजस्यनुप्रसवेमातरंमहीमदितिंनामवचसाकरामहे॥य

स्यामिदंविश्वंभुवनमाविवेशतस्यांनोदेवःसविताधर्मसाविषदित्यथाश्वान्पल्पूलयत्यप्स्वंतरमृतमप्सुभेषजमपामुतप्रशस्तिष्वश्वाभवथवाजिनइ
त्यदक्षिणंयोग्यंयुनक्तिवायुर्वात्वामनुर्वात्वागंधर्वाःसप्तविंशतिः।तेअग्रेअश्वमायुंजंतेअस्मिन्जवमादधुरित्यथास्यदछंमम्जन्यतेऽपन्नयादाभुहेमन्य
र्द्धभिःककुन्मान्प्रतूर्तर्वाजसातमस्तेनायंवाजंसेदित्यैवमेवोत्तरंयोग्यंयुनक्तितस्यैमेवोत्तरतःप्रष्टिमुपनियुनक्तितयोरेवमेवदछंमम्जन्यतएतस्ययोग
मनुसर्वंप्राणिवध्युज्यंतेधिकक्ष्या – स्तिनःकुर्वंतिप्रवेष्टयंतिवासोभागान्वसानांद्दशास्तुनिष्करज्जूःप्रग्रथ्नतिपूगशोदक्षिणाआयातयत्यथसौरीभ्य
मृगभ्यांगार्हपत्येजुहोतिनयवस्यचाग्नीध्रेजुहोतिसृज्यंतिदक्षिणादक्षिणापथेनसयत्किंचिद्ददातिहिरण्यमुख्यमेवददात्यथवासांस्यथयुक्तान्निगा
अश्वहस्तिदासीपुरुषमंततोऽदत्ताएवेतरथाअतिवर्ततेनैतस्यरतआजिसृतआजिंधावंतिमनसैवस्वरथंनिष्कामतिमनसैवस्वरथमध्वर्यवेददाति
मनसासमनुदिशत्यदक्षिणास्त्रिभिर्मरुत्वतीयैश्चरतिमाहेंद्रेणाराशांसाआप्यायितादक्षिणाहविर्धानस्यापालंबमधोधोमाहेंद्राय॥६॥अथयाचतिनैवारं
सप्तदशशरावंसएषबार्हस्पत्योभवतितेनचरतिबृहस्पतयेनुब्रूहीतिबृहस्पतिंयजेतिनमनिष्टस्विष्टकृतमपिधायप्रज्ञातंनिदधात्यथास्यैतत्पुरस्ताद्वेदौदुंब
रेद्रोणेसर्वौषधंदध्नाज्यैसमुदायुतंभवतितस्यौदुंबरेणस्रुवेणोपघातंसप्तान्नहोमान्जुहोतिवाजस्येमंप्रसवःसुषुवेअग्रइत्यभिषेकायप्रेरकंपरिशि
नष्टस्यथैनमपिधायप्रज्ञातंनिदधात्यथपुरस्तादभिषेकस्यषट्पार्थानिजुहोत्यग्नयेस्वाहासोमायस्वाहेत्यपयजमानायतनेकृष्णाजिनंप्राचीनग्रीवमुत्तरलो
मास्तृणातितद्यजमानंप्राञ्चमुपवेश्यसुवर्णरजताभ्यांरुक्माभ्यांपर्युपास्यसर्वौषधेनपुरस्तात्प्रत्यंचमभिषिंचतिशीर्षतोभिषिंचत्यामुखादन्वस्राव

Indira Gandhi National
Centre for the Arts

बौ॰क॰सू॰ यतिदेवस्य त्वा स॰ भ्यां सरस्वत्यै वाचो यंतुर्यंत्रेणाग्नेस्त्वा साम्राज्येनाभिषिंचामीन्द्रस्य त्वा साम्राज्येनाभिषिंचामि बृहस्पतेस्त्वा साम्राज्येनाभिषिंचामीति स वाज॰
१३३ मुत्सृष्ट समुत्क्रोशंत्यभिषेचयमसावामुष्यायणोऽमुष्यपुत्रोऽमुष्यपौत्रोऽमुष्यनप्ता वाजपेयेनेत्यथ भूर्भुवः स्वरिति वाचं विसृजते द्वाभ्यामुखं विमृष्टे गायत्रा
न्विष्णुक्रमान्क्रामतेऽथोपरिष्टादभिषेकस्य षट् पार्थानि जुहोति इन्द्राय स्वाहा घोषाय स्वाहा द्वादश राष्ट्रभृतानामेवेहि जुहोति पृथिव्यै स्वाहान्तरिक्षाय स्वा
हेत्येवं तस्याः बार्हस्पत्यस्य स्विष्टकृता चरत्यथैनमासाद्यांतरेण चात्वालोत्करावुदङ् उपनिष्क्रामत्यन्तरेणैवैते रथा युक्तास्तिष्ठंति तदेतान्यजुर्युजोऽश्वानवघ्राप
यति वाजिनो वाजजितो वाजं सरिष्यंतो वाजं जेष्यंतो बृहस्पतेर्भागमवजिघ्रतेत्यथैनमपिधाय प्रज्ञातं निदधात्यथ रथमभिप्रैति विष्णोः क्रमोऽसि विष्णोः क्रांत
मसि विष्णोर्विक्रांतमसीत्यथ रथस्य पक्षसी संमृशत्यंको न्यंकावभितो रथं यावित्यथ रथमातिष्ठति देवस्याहं सवितुः प्रसवे बृहस्पतिना वाजजिता वाजं जेषमित्येतस्मि
न्काले चात्वाले रथचक्रं निमितं ब्रह्मारोहति नमतः वानुमंत्रयते देवस्याहं सवितुः प्रसवे बृहस्पतिना वाजजिता वर्षिष्ठं नाकं रोहेयमित्यथ यजमानमन्वास्थायो
ज्जितीर्वाचयत्यग्निरेकाक्षरेण वाचमुदजयदिति सप्तदश अथास्मा अश्वाजनिं प्रयच्छत्यश्वाजनि वाजिनि वाजेषु वाजिनीवत्यश्वान्त्समत्सु वाजयेति तयाथ युक्त
मश्वाक्षिपत्यर्वासीति दक्षिणं सप्तिरसीति मध्यमं वाज्यसीत्युत्तरमथैनानाजिसृजो विख्यापयति वाजिनो वाजं धावत मरुतां प्रसवे जयत वि योजना मिमीध्वमध्व
नस्कभ्नीत काष्ठां गच्छत इति सोऽर्द्धबर्येषा स्थूणा सप्तदशास्त्रास्त्या प्रव्याधेषु निमितानां काष्ठेत्याचक्षते तामभिसृत्यैनामप्राप्य निवर्तन्ते पक्षसमेनां कृत्वा सव्यां १३३
नवरष्ट्य दक्षिणोरनुपरिवर्तयाध्वैर्मा अग्रस्ततः प्रसर्पन्तीति ॥ ७ ॥ अथाभिसर्पयजमानमाहेन्द्रं ग्रहं ग्रहीष्यामीत्यन्वारब्धे यजमाने माहेन्द्रं ग्रहं गृह्णाति महां

इन्द्राय ओजसेत्यनुद्रुत्योपयामगृहीतोऽसि महेन्द्राय त्वा जुष्टं गृह्णामीति परिमृज्य सादयत्येष ते योनिर्महेन्द्राय त्वेति देवतान्यं चैन्द्रानतिग्राह्यान्सह संसादयत्यथा
पउपस्पृश्य बर्हिषी आदाय वाग्यमः प्रत्यङ् कृत्वा स्तोत्रमुपाकरोति स्तवते मा इन्द्राय प्रस्तुते साम्नि संप्रैषमाह ब्रह्मन्वाजिनां साम गायाजिसृत आजिं
धावत दुन्दुभीन्समाघ्नताभिषातारोभिषुणुता दर्भानीदाशिरं विनयोत्कर खरमुद्वादय प्रतिप्रस्थातर्वारुणमेककपालं निर्वप सोम्यां विश्रीतीत्यथा संप्रैषां
तं कुर्वन्ति गायति ब्रह्मा वाजिनां साम तं यत्र कश्चन परिक्रम्यावेक्षयति धावंत्याजिसृत आघ्नंति दुन्दुभीन्संप्रवदन्ति वातरंहः प्रसवे दिता वाचोनुमंत्रय
त इन्द्राय वाचं वदतेन्द्रं वाजं जापयतेन्द्रो वाजमजयिदित्यथ रथान्धावतोऽनुमंत्रयते वाजे वाजेवत वाजिनो न इति चतसृभिरनुच्छंदसं गांति घोषाः त्रा
स्त्रायहोत्रणधोत्तमाति प्राकृहोतुः कालात्पराङावर्ततेऽध्वर्युरभ्येनमाह्वयते होता प्रत्याह्वयतेऽध्वर्युः शासति प्रगृणा प्रसिद्धमुक्थ्यं प्रतिगीर्य प्राङ्त्सोध्व
छत एतं माहेन्द्रं ग्रहमनूद्यच्छत इतरानुपोद्यच्छंते नाराशंसानथाश्रावयत्याश्रावयास्तु श्रौषडुक्थशा यज सोमस्येति वषट्कृते जुहोति तदेतान्यं चैन्द्रान
तिग्राह्यान्सह जुह्वति वषट्कृतानु वषट्कृते द्विर्जुहोति तथैव द्विर्नाराशंसाननुप्रकंपयति द्विर्हुते माहेन्द्रः परिशेत आयंति रथा आगतान्रथाद्
द्वायात्वा ज्यस्मालोसंस्रवांस्सयचस्मेरथश्रेषमाचक्षत आग्नीध्र एतां जुहोत्येतस्मास्यक्ष्वतस्तुरण्यतद्रुक्भयेनैव रथविमोचनीयं जुहोत्यामा
वाजस्य प्रसवो जगम्यादिति ॥ ८ ॥ अथ याचति नैवारं सप्तदशकपालं शरावं सप्तदशासौवर्णानि रुक्मानि हिरण्यपात्रं मधोः पूर्णमित्येतत्समादायांत
रेण चात्वालोत्करावुदङ् उपनिष्क्रामत्यन्तरतः एते रथा युक्तास्तिष्ठंति तदेतान्यजुर्युजानश्वानवघ्रापयति वाजिनो वाजजितो वाजं ससृवांसो वाजं जिगि

Indira Gandhi National
Centre for the Arts

बौ० क० स्०
१३४

वाजंसीरहस्पतेर्भागे निमृद्धभिरथेनमपिधाय प्रज्ञातं निदधात्यथरथान्विमुच्यमानाननुमंत्रयतइयंवः सासत्यासंधाभूद्यामिंद्रेणसमधध्वमितिदुंदुभी वाज०
वनस्पतीनुमंत्रयतेऽजीजिपत वनस्पतयइंद्रंवाजंविमुच्यध्वमितितदेतंयजुर्युजंरथंविमुंचतियथारतमितरान्व्यवर्तयंस्फसंगच्छतएनमेतआजिसृतस्ते
भ्यएकैकंरुक्मकंव्युत्सयच्छति सनिसार्धंसमादायहिरण्यपात्रंमधोःपूर्णमित्येकधाउपहरति॥९॥तद्धृत्वाप्रतिगृह्योपावरोहत्यथाहाजिजितस्तोदक्षि
णापथेनोपातीत्यदक्षिणाश्रोणिमभिनिश्रयध्वंमारुताअग्रेणाहवनीयंपरीत्यदक्षिणामंसमुपश्रयध्वमितितदेतान्विमिताभ्यामभिनिघ्नंसथाहेहिय
जमानेतिपूर्वयाद्वाराहविर्धानंप्रपाद्ययजमानंसोमग्रहाननुपस्थापयति॥१०॥संसृष्टचस्थसंमाभद्रेणपृङ्क्तेतिविसृष्टचस्थविमापाप्मनापृङ्क्तेतिसुराग्रहानथै
तांसुरांसंप्रेरकामादयेतांश्चसुराग्रहान[illegible]उपहरंतितांतेपिबंतोरममाणामद्रीयमानाआसतेऽत्रयन्मारुत्याअनवदानीयंतदुपयानीयानंत
रेपापर्णाज्ञारवासुन्यस्यतितत्समुत्कृष्यविमाथीकुर्वतेऽथयाचत्याज्यस्थालीस्रुवांतांप्यदर्भमयमित्येतत्समादायारोहिहियजमानेत्यन्वर्ययजमानोनूचीपत्न्या
हवनीयेजुहोत्यन्वारभेयजमानेवाजश्चप्रसवश्चेतिद्वादशाप्तावाहुतीरथयजमानंतार्प्यंपरिधापयतिक्षत्रस्योल्बमसिक्षत्रस्ययोनिरसीतिदर्भमयंपत्नी
अथैतांसीतियजमानायतनात्प्राचीवोदीचीवायूपमभ्यायात्यथजायामामंत्रयतेजायएहिस्ववरोहावरोहावेतिरोहावहिस्वर्वइतीतराप्रत्याहारोहंना
वुभयोःस्वर्वारोक्ष्यामीतियजमानस्त्वन्नावुभयोःस्वर्वारोहेतिपत्नीतांदशभिःकल्पैरोहत्यायुर्यज्ञेनकल्पतामित्यंतंगत्वाबाहूउद्गृह्णातिस्वर्देवाअगन्मामृ १३४
ताअभूमप्रजापतेःप्रजाअभूमेत्यथेमंलोकंप्रत्यवेक्षतेसमहंप्रजयासंमयाप्रजासमहंरायस्पोषेणसंमयारायस्पोषःइत्यथैनांदशभिरेवसीतिसुपाव

रोहतिसयावतिमन्यतएतावतिमेदास्यंतीतितदेनमासपुटेघ्नंति॥११॥अन्नायत्वेतिपुरस्तादध्वर्युरन्नाद्यायत्वेतिदक्षिणतोब्रह्माबाजायत्वेतिपश्चाद्धोता
वाजजित्यायैत्वेत्युत्तरतोउद्गातायस्तुवान्नतेनकामयंतेअध्वर्युरेवपुरस्ताद्धंतिदक्षिणतःप्रतिप्रस्थातापश्चादाग्नीध्रउत्तरतउन्नेतातेषांतथाविभागोयथादुंदु
भीमथास्मैप्रत्यवरोहतेआसंदींनिदधातितस्यांबस्ताजिनमास्तृणातिबस्ताजिनेयजमानंहिरण्यमथदक्षिणंपादंहिरण्यमुपावरोहत्यमृतमसीति
सव्यंबस्ताजिनेअथैनमेतयासंद्यासंद्यासदआवहंत्यानाव्रजत्यन्वायत्येनमेतेचमसाअत्रैतस्यबार्हस्पत्यस्येडामुपह्वयतइडोपहूयतइडोपहूतंमाहेंद्रंहो
तारंचैवाध्वर्युश्चमसंभक्षयंतोनाराशंसंसर्पतिननाराशंसान्त्रैतेषामतिग्राह्याणांमुख्यपात्रेसंस्रावान्समवनीययजमानएवप्रत्यक्षंभक्षयत्यपिवेतत्र
यःसमुपहूयभक्षयंतियथाचमसंचमानहिन्वमदत्यात्मानंप्रत्यभिमृशंतिनाप्याययंतिचमसान्तत्सर्वभक्षामार्जयंतेऽथेंद्रायत्वेंद्रायत्वेत्येवंत्रिभिरुक्थपर्या
येश्चरंतिसंतिष्ठतेमाध्यंदिनंसवनं॥१२॥अथसावित्रंकृत्वाप्रसर्पतितृतीयसवनायप्रसिद्धमादित्यग्रहेणाचरित्वाग्रयणंगृह्णात्यथषोडशिनमभि
गृह्णात्यसाविसोममिंद्रतइत्यनुद्रुत्योपयामगृहीतोसीद्राययत्वाषोडशिनेजुष्टंगृह्णामीतिपरिमृज्यसादयत्येषतेयोनिरिंद्रायत्वाषोडशिनइत्यथोक्
थ्यंगृह्णातिसमानंकर्मापवमानात्पवमानेनचरित्वास्विधामंन्यपशुभिश्चरंतितेषांनानामनोतानानादेवतानानाऽभिमर्शानानावसाहोमाःसमानोव
नस्पतियागःसमानःस्विष्टकृन्नैषवान्समानीडासमान्योदिशोनानादिशाउत्येकेसमानंकर्माध्रुववज्जमश्चमसेभ्योध्रुववद्भिश्चमसैश्चरित्वात्रिभिरु
क्थपर्यायैश्चरंतींद्रायवरुणाभ्यामिंद्राबृहस्पतिभ्यामिंद्राविष्णुभ्यामित्यथषोडशिनाचरत्यथप्राडाययन्नाहहोतुश्चमसमनून्नयध्वमुन्नेतःसर्वश्या

Indira Gandhi National
Centre for the Arts

वराजानमुन्नयमातिरिरिच इति च होतृचमसमेव प्रथममुन्नयंति यथोपपारमितरान्त्सर्वश एव राजानं समुन्नीयोत्तरवेद्यां संसादयंति तदेतान्
प्राजापत्यान्त्सहसंसादयन्त्यथाप उपस्पृश्य बर्हिषी आदाय वाचंयमः प्रत्यङ् हुत्वा स्तोत्रमुपाकरोति स्तुवते तदेतद्धूमसामिकविंशं त्रीवेष्मवीषु त्रिःपिवि
ष्टवतीषु कुर्वंति होत्रस्य धोत्रमेति प्राकुर्मेलुः कालास्परागवर्तते ध्वर्युरभ्येनमाह्वयते होतात्रप्याह्वयतेऽध्वर्युः शंसं सात प्रति गृणाति प्रसिद्धमुक्थं प्रतिगी
र्यं प्राह धीयच्छतएतं होतृचमसमनू यच्छंतइतरानुपीयच्छंते चमसानथाश्रावयत्योश्रावयास्तुश्रौषडुक्थशा यज सोमानामिति वषट्कृते जुहोति तदे
तान्प्राजापत्यान्त्सहजुहोति वषट्कृतानुवषट्कृते हुते जुहोति तथैवहविर्भिः सर्वाश्चमसानु जुह्वत्यथ भक्षैः प्रत्यंच आद्रवंत्यनुसवनभक्षः प्रजापतिनापीत
स्येत्यत्रैतेषां प्राजापत्यानां मुख्य पात्रे सं स्राव भवनीयं यजमान एव प्रत्यक्षं भक्षयत्यपि वैनानत्सर्वश एव चमसेषु व्यवनीय भक्षयेयुरित्येतदपरमत्र यन्मारु
त्या अवदानीयं तद्दृत्विग्भ्य उपहरति तदेतत्समावच्छो विभज्या प्राश्नंति होतृचमसमेवेते त्रयः समुपहूय भक्षयंति यथा चमसं चमसमाप्यन्व्वमइत्या त्मानं प्रत्य
भिमृशंते नाप्याययंति चमसान्सर्वभक्षामार्जयंतेऽथ संप्रेष्यमाहाग्नीध्रीये यजमानं गारा नाहरोपयष्टरुपसीदब्रह्मन्प्रस्था स्यामः समिधमाधायाग्नीदग्नी
न्त्सकृत्सकृत्समृड्ढीत्याहूरं त्वेतानाग्नीध्रीये यजमानं गाराः स्तानग्रेणहोतारं निवपन्नुपसीदन्नप ययष्टा गुदरततीयेर्न्नेतानि गुदरततीयान्ये काद्दशाधारूवी १३५
पयष्टा पयजति समानमतर्ध्वं संतिष्ठते वाजपेयो वाजपेयेनेष्ट्वा प्रत्यवरोहणीयेनाग्निष्टोमेन चतुष्टोमेन यजेत संतिष्ठते वाजपेयः संतिष्ठते वाजपेयः ॥१३॥
इति बौधायनकल्पसूत्रे वाजपेयप्रकरणं समाप्तं ॥ ॥श्रीरस्तु॥ ७ ॥अथ बौधायनकल्पसूत्रे तिरात्र प्रारंभः॥ ॥अतिरात्रं करिष्यन्नुपकल्पयते

चतुरोतिरात्रपशून्रूपाणि त्वां गमश्वमौदुंबरं षोडशिपात्रं चतुःस्रक्तिज्यायसीं भ्रणान्ज्यायस एक धनान्दीक्षंते रोहिण्या पिंगलैकहायन्या सोमं क्रीणा
ति द्वादशोपसदः प्रसिद्धेन कर्मणोपवसथ्यादेत्यथ वसतीवरीः परिहृत्य पयांसि विशिष्ट्यापवर्स्यन्यथातो महारात्र एव बुध्यंते प्रातरान्यान्नीगृहीत्वा राजानमु
पावहृत्य प्रातरनुवाकमुपाकरोति परिहिते प्रातरनुवाके पोछेत्यद्भुरुदत्यतिरात्रं क्रतुमुपैति प्रसिद्धोऽभिषवः प्रसिद्धं ग्रहा गृह्यंते समानं कर्मणाग्रयणाद्ग्रहा दा
ग्रयं गृहीत्वाथ षोडशिनं गृह्णात्यातिष्ठ वृत्रहन्रथमित्यनुद्रुत्योपयामगृहीतोसीन्द्राय त्वा षोडशिने जुष्टं गृह्णामीति परिमृज्य सादयत्येष ते योनिरिंद्राय
त्वा षोडशिन इत्यथोक्थ्यं गृह्णाति समानं कर्मा दाश्विनाद्ग्रहा दाश्विनं ग्रहं गृहीत्वा वतस्रो रसनाना आदाय यूपमभ्येति स्ववर्तं यूपमुत्सृज्य चतुरोतिरात्र पशूनु
पाकरोत्याग्नेयमैंद्राग्नमैंद्रं सारस्वतीं मेषीमिति तेषां प्रसिद्धं वपाभिश्चरित्वा प्रसर्पति प्रातःसवनाय तदुक्थ्यां संतिष्ठते प्रसर्पति माध्यंदिनाय सवनाय प्रसि
द्धोऽभिषवः प्रसिद्धं ग्रहा गृह्यंते समानं कर्मा दाग्रयणाद्ग्रहा दाग्रयणं गृहीत्वाथ षोडशिनमभिगृह्णाति इन्द्रमिद्धरी वहत इत्यनुद्रुत्योपयामगृहीतोसीन्द्राय त्वा
षोडशिने जुष्टं गृह्णामीति परिमृज्य सादयत्येष ते योनिरिन्द्राय त्वा षोडशिन इत्यथोक्थ्यं गृह्णात्युक्थ्या माध्यंदिनं संतिष्ठते प्रसर्पति तृतीयसवनाय प्र
सिद्धमादित्यग्रहेण चरित्वाग्रयणं गृह्णात्यथ षोडशिनमभिगृह्णात्यसावि सोमइन्द्र त इत्यनुद्रुत्योपयामगृहीतोसीन्द्राय त्वा षोडशिने जुष्टं गृह्णामीति
परिमृज्य सादयत्येष ते योनिरिन्द्राय त्वा षोडशिन इत्यथोक्थ्यं गृह्णाति समानं कर्मा पवमानात्सवमानेन चरित्वा स्वधाम न्पशुभिश्चरंति तेषां नानामनोता
नानादेवता नानाप्रत्यभिमर्शी नानानावसाहोमाः समानो वनस्पतिः समानः स्विष्टकृत् प्रैषा वान्त्समानीडा समन्योदिशो नानादिशा इत्येके समानं कर्मा

Indira Gandhi National Centre for the Arts

बौ०क०सू०
१३६

अतिरा०

ऋवव-ञ्चश्चमसेभ्यो ऋवनङ्गिश्च मंसेभ्वरित्वात्रिभिरुक्थ्यपर्यायैश्चरंतीन्द्रावरुणाभ्यामिंद्राबृहस्पतिभ्यामिंद्राविष्णुभ्यामित्यथ षोडशिना चरिष्यन्प्राङुन्न
हहोतुश्चमसमनून्नयध्वमुन्नेतः सोमं प्रभावयेति होतृचमसमेव प्रथममुन्नयंति यथोपपादमितरानुत्समुन्नीयोत्तरवेद्यां संसादयंतितदेतं षोडशिनं संस
हस्रं सादयंति यस्मान्नजा० त्रिष्टुप् एषत्र० गायत्री प्रतेम० उष्णिक्कुइंद्रोना० अनुष्टुप् इति चतःसृभिः करोति ॥ १॥ अथैनमुपतिष्ठते यस्मान्नजातः परो अन्यो अ
येस्ति आ विवेशभुवनानि विश्वा० हरिवर्पसं गिरस्तुतिमयाप उपस्पृश्य बर्हिषी आदाय वाचंयमः प्रत्यङ् द्रुत्वा समयाविषितस्सूर्ये हिरण्येन षोडश्युपाकरणात्स
र्वमादित्यो स्तमितश्चेतू गार्हपत्ये तिस्रः स्रुवाहुतीर्जुहुयात् भूर्भुवः स्वरिति षोडशिनस्तोत्रमुपाकरोति सपुरस्तात्स्त्यं चमरुणं पिशंगमश्वं धारयंति रूप्यां
वा हिरण्यं संप्रदाय स्तुवते होत्र एषोत्तमेति प्राकुर्होतुः कालास्पराउनवर्तते ऽध्वर्युरभ्येनमाह्वयते ऽध्वर्युःशांसति प्रतिगृणात्यथ यत्र होतुरभिजानात्यात्वा
वहंत्वैतु हरय इति तदुभयतो मदं प्रतिगृणात्योथामोदैवोमथेत्यथ यत्र होतुरभिजानाति प्रप्र वस्त्रिष्टुभमिति तत्स्रासिमुरथ्यमुक्थ्यं प्रतिगीर्य प्राङुन्त्यो यच्छत एतं षो
डशिनं ग्रहमनूयच्छंते चमसानथाश्रावयत्योश्रावयास्तुश्रौषडुक्थ॥शायजसोमानामितिवषट्कृते षोडशिनं जुहोतीन्द्राधिपतेधिपतिस्त्वं देवानामस्यधिप
तिं मामायुष्मंतं वर्चस्वंतं मनुष्येषु कुर्विति वषट्कृतानुवषट्कृते द्विर्जुहोति तथैव द्विर्द्विः सर्वांश्चमसानजुहूत्यथ भक्षैःप्रःस्यंच आङ्वं सनुसवनभक्षइंद्रेण
षोडशिनापीतस्येति तस्याप्युदितो भक्षो यजमानवर्ज्यो ह्ययजमानस्य होतृवज्रो होतुस्ताबुच्चैरध्वर्यवे प्ररूप्यातांवषट्कर्तुर्भक्षइत्येव ब्रूयात्तथात्मानं भक्षांतरेणो १३६
जितस्य भक्षइंद्रश्च सम्राड्वरुणश्च राजा तौ ते भक्षं चक्रतुरग्र एतं ॥ तयोरनुभक्षं भक्षयामि वाग्जुषाणा सोमस्य तृप्यतु तस्य त इंद्रेण षोडशिनापीतस्य मधुमत

उपहूतस्योपहूतो भक्षयामीति निर्णिज्य पात्रं प्रयच्छ स्त्रेतमरुणपिशंगमश्वं ददाति रूप्यामं वा होतृचमसमेवैतेत्रयःसमुपहूयभक्षयंति नाप्यायंति चमसान्
सर्वभक्षामार्जयंते ॥ २॥ अथसंप्रैषमाह प्रतिप्रस्थातरग्नेरोयणात् तीर्यगुदत्तीयानिजाघनीः वषराज्यं गोपायाग्नीदाश्विनं ते द्विकपालं श्रृतमथापररात्रेऽस्त्विति
यथासंप्रैषंतोकुरुतोथ विनिस्रप्यरात्रेयं संप्रसर्पयति संप्रसृप्तान्विदित्वाध्वर्युः प्राङुन्नयन्नाहु होतुश्चमसमनून्नयध्वमुन्नेतः सोमं प्रभावयेति होतृचमसमेव प्रथ
ममुन्नयंति यथोपपादमितरानुत्समुन्नीयोत्तरवेद्यां संसादयंतन् यथाप उपस्पृश्य बर्हिषी आदाय वाचंयमः प्रत्यङ् द्रुत्वा स्तोत्रमुपाकरोति स्तुवते होत्र एषोत्तमेति
प्राकुर्होतुः कालास्पराउनवर्तते ध्वर्युरभ्येनमाह्वयते होता प्रत्याह्वयते ध्वर्युः शांसति प्रतिगृणाति प्रसिद्धमुक्थं प्रतिगीर्य प्राङुत्यो यच्छत एतं होतृचमसमनूय
च्छंते चमसानाप्य० इंद्रेणपीतस्येति होतृचमसमेवैतेत्रयः समुपहूयभक्षयंति ० नाप्यायंति चमसान् सर्वभक्षामार्जयंते ऽथप्राङुन्नयन्नाह मैत्रावरुणस्य चमसम
नून्नयध्वमुन्नेतः सोमं प्रभावयेति मैत्रावरुणचमसमेव प्रथममुन्नयंति यथोप० स्तुवते मैत्रावरुणाय मैत्रावरुणस्य कालास्पराउनवर्तते ध्वर्युरभ्येनमाह्वयते मैत्रा
वरुण० एतं मैत्रावरुणचमसमनूयच्छं० सर्वभक्षामार्जयंते ऽथाह प्रतिप्रस्थाताश्चमसगणोते प्रचरेति तच्छ्रुत्वा प्रतिप्रस्थाता प्राङुन्नयन्नाह ब्राह्मणाच्छंसिनश्च
मसमनून्नयध्वमुन्नेतः सोमं प्रभावयेति ब्राह्मणाच्छंसिनश्चमसमेव प्रथममुन्नयंति यथोपपा० ब्राह्मणाच्छंसिन एषोत्तमेति प्राकुर्ब्राह्मणा० वर्तते मार्जयं
ते ॥ ३॥ अथप्राङुन्नयन्नाहाच्छावाकचमसमनून्नयध्वमुन्नेतः सोमं प्रभावयेति० इंद्रेणपीतस्येत्याच्छावाकचमसमेवैतेत्र० मार्जयंते होत्रे प्रथमं स्तुवतेऽथ मैत्रा
वरुणायाऽथ ब्राह्मणाच्छंसिनेऽथाच्छावाकायाध्वर्युः पूर्वाभ्यां चमसगणाभ्यां प्रचरति प्रतिप्रस्थातोत्तराभ्यां सर्वे ऐंद्राश्चमसगणा भवंतीति वार्यप्रथमश्वतुः

Indira Gandhi National
Centre for the Arts

पर्यायः संतिष्ठत एवमेव द्वितीयः संतिष्ठत एवं तृतीयो माध्यंदिनपर्यायेणाश्विनमेव चरंत्यथ विर्जन सद्य राथंतराय संधयेप्रसंपतिप्रसप्रान्विदित्वाऽध्वर्युः प्रा

ज्ञायन्नाह होतुश्चमसमनून्नयध्वमुन्नेतः सर्वगणवराजानमुन्नयमातिरीरिच इति होतृचमसमेव प्रथममुन्नयंतियथापपादमितरान्सर्वगणवराजानं समुन्नी
य तरवेद्यां संसादयंति तं रेत दाश्विनमुपस्तीर्णाभिघारितं सहसंसादयंत्यथाप उपस्पृश्य बर्हिषी आदाय० होत्रग्न्याधत्तमेति प्राकृहोतुः काल० आमह्या
नाम्या ग्रो छस्यते परः सहस्रमाश्विनं भवतीति ब्राह्मणं प्रसिद्धमुक्थं प्रतिगीर्य प्राज्ञायन्नाहाश्विभ्यां तिरोअन्ह्यानां सोमानामनुब्रूहीति प्राउक्तो वषट्कृतए
तं होतृचमसमनूद्गच्छंत आश्विनमुपोद्यच्छंते चमसानथाश्रावयत्याश्रावयास्तु श्रौषडश्विभ्यां तिरोअन्ह्यान्त्सोमान्प्रतिप्रस्थातान्प्रेष्येति वषट्कृते जु
होति वषट्कृते दाश्विनमुपस्तीर्णाभिघारितं सह सर्वं हुतं जुहोति कर्त्रो नियमः के० वषट्कृतानुवषट्कृते द्विःस्कन्नाद्द्विर्जुहोति तथैव द्विर्द्विः सर्वांश्चमसानु
न्नद्धस्यथ भक्षैः प्रत्यंच आद्रवंत्यनुसवनभक्षोऽश्विभ्यां पीतस्य तस्य भक्षः सर्वगणस्य ते सर्वगणाश्विभ्यां पीतस्येति तिरोअन्ह्यस्य सोमस्य ऋषुतस्य मधुमत
उपहूतस्योपहूतो भक्षयामीति होतृचमसमेवैते त्रयः समुपहूय भक्षयंति सर्वभक्षान्मार्जयंतेऽथ संप्रैषमाहाग्नीधोपयजानं० द्वीत्याहरंत्येता नाग्नीध्रा दोपय
पयष्टा गुदकांतीये रश्रैता निगुदकांतीयान्ये कादशाकृत्वोपयष्टोपयजति समानमतऊर्ध्वं संतिष्ठतेतिरात्रः संतिष्ठतेतिरात्रः ॥ ४ ॥ ॥ इति बोधायनकल्पसू
त्रे अतिरात्रप्रकरणं समाप्तं ॥ ॥ ७ ॥ श्रीरस्तु ॥ ॥ अथ बोधायनकल्पसूत्रे द्वादशाहप्रारंभः ॥ ॥ अथ द्वादशाहेन यक्ष्यमाणो भवत्येको वा बहवो वा यद्ये

को दक्षिणावता यजेत यदि बहवो मावास्यायेषे उ वैन्हनोपरिष्टाद्दीक्षते गृहपतेरेरण्याः संजानते पृथग्वा ते यदि गृहपतेररण्योः संजानते मथित्वा गार्हप

त्यमाहवनीयमुद्धरंति ग्रामाद्वृतश्रपणमाहरंति यद्युवै पृथक् संजानते गृहपतिरेव प्रथमो मंथते तं दितरे पर्युपविश्य मथित्वा मथित्वैव गार्हपत्ये संनिव
पंति तस्मादेकवद्भूतादाहवनीयमुद्धरंति ग्रामाद्वृतश्रपणानाहृत्य संनिवपंत्यथ यदि पश्चादपर आगच्छति मथित्वैव गार्हपत्ये धिं संनिवपत्याहवनीये धेग्रा
माद्वृतश्रपणमाहृत्य निवपत्यथैनं पूर्वेषु कर्मसु ह्वयंतेऽथातः पवमानस्यैव मीमांसा गृहपतिमेवाध्वर्युः प्रथमं पवयत्यथ होतारमथ ब्रह्माणमथोद्गाता
रं प्रतिप्रस्थाताध्वर्युं पवयित्वा प्रस्तोतारं प्रत्नोऽस्तारं ब्राह्मणाच्छंसिनमाग्नीध्रः प्रतिप्रस्थातारं पवयित्वाच्छावाकं नेष्टारं पोतारं सदस्यमुन्नेतारमाग्नी
ध्रं पवयित्वाग्नायस्तुतं स्म ब्रह्मण्यं प्रतिहर्तारमात्मानं मं ततस्ते चेद्भूयुरध्वर्युर्वा वस्र्वस्य पवयित्वासनः सर्वान्पवयत्विति स एवैनान्त्सर्वान्पवयत्यपि वान्योन्यं
पवयति यस्यधीयंते भवंति ॥ १ ॥ तेषां प्रसिद्धा दीक्षणीयेष्टिस्तायते सकृदाश्राविते सयत्राहभरतवदिति तद्गृहपतेरेवार्षेयं प्रथमं वृणीतेऽथ होतुरथात्म
नोथ ब्रह्मणोथोद्गातुरथ प्रतिप्रस्थातुरथ प्रस्तोतुरथ प्रत्नाग्नस्तुरथ ब्राह्मणाच्छंसिनोच्छावाकस्य सदस्यस्याग्नीध्रः पोतुर्नेष्टुर्ग्रावस्तुत उन्नेतुः सुब्रह्मण्यस्य
प्रतिहर्तुरं ततो ब्रह्मण्वदिति मममानं ते सर्वे दीक्षाहुतीषु समन्वारभंते गृहपतिमेवाध्वर्युरुच्चैः कृष्णाजिनेवाचयतितरे चैतरेनुनिष्क्रामंत्स पिवान्योन्यं वा
चयंति यद्य धीयंते भवंतितयथोत्साहं व्रतदुघमुपयंत्येकैको वा बद्धीर्वा तेषां यथैव प्रवरानुपूर्व्यमेवं घर्मोच्छिष्टेष्वति ग्रास्थमसेषु षोडशिनीषध्यासुपस
द्युत्तरवेदिं संनिवपंति यद्यनग्निचित्यो भवत्यथ यदि साग्निचित्यः प्रथमायामेवोपसद्युत्तरवेदिं संनिवपंति तेषां ॥ २ ॥ तेषां द्वादशाहदीक्षा द्वादशोप
सदो द्वादशाहं प्रसुतो न द्वादशाहेऽग्निं चिन्वीतेत्येकआकुश्चिन्वीत तदु है के प्रसिद्धेन कर्मणोपवसथा स्वंति तेषां ज्योतिष्टोमो वैश्वानरः प्रायणीयोतिरात्र

Indira Gandhi National
Centre for the Arts

स्तायंतसयत्रमाध्यंदिनेसवनेतृतीयसवनायवसतीवरीभ्योवनयतितद्धसतीवरीकलशेयावन्मात्रमवशिष्याग्नीध्रंकृत्वाच्छायायैचातपतश्चसंधौग 
ह्णातिहविष्मतीरिमाआपो॰भस्तुसूर्यइतिप्राहीनसंततितरेतांतमेवपुनःपुनश्चोदयिष्यामहइतिवदंतःसोत्रेवयज्ञस्यपुनरालंभंजपतियज्ञायज्ञियस्य
वास्तोत्रेशंयुवाकेवातेषांज्योतिष्टोमोवैश्वानरःप्रायणीयोतिरात्रःसंतिष्ठंतेतस्मिन्त्संस्थितेविवर्तयंतिपरिधीननुप्रहरंतिप्रस्तरंपत्नीसंयाजांतेतिप्रैषेण
ब्रह्माणवाचंयच्छतिपरिहृतासुवसतीवरीष्वाहूतायांसुब्रह्मण्यायांब्रह्मावाचंविसृजतेप्रतिपद्यतेदिवाप्रातरनुवाकेनाह्नासंक्रामंतिहोताछंदांस्यन्वा
हनिमीत्याध्वर्युरुपांशुंजुहोतिरात्र्यैरूपमितिवदंस्तायंतेत्रिवृदग्निष्टोमोरथंतरसामारथंतराद्येनमाहेंद्रस्यस्तोत्रमुपाकरोत्येतावदेवैतदहःशिल्पंक्रि
यतेऽहीनसंततिंकरोत्यथश्वोभूतेतायंतेपंचदशउक्थ्योबृहत्सामाऽदुभिशब्देनेतदहरध्वर्युर्माहेंद्रस्यस्तोत्रमुपाकरोत्येतावदेवैतदहःशिल्पंक्रियतेऽही
नसंततिंकरोत्यथश्वोभूतेतायंतेसप्तदशउक्थ्योवैरूपसामाधावेनेतदहरध्वर्युर्माहेंद्रस्यस्तोत्रमुपाकरोत्येतावदेवैतदहःशिल्पंक्रियतेऽहीनसंततिं
करोत्यथश्वोभूतेतायंतेऽएकविंशउक्थ्योवैराजसामाग्नेयंचषोडशिनीश्चातिग्राह्याश्चनातिग्राह्यःषोडशीत्येकआहुरेकविंशमेतदहर्न्यूङ्खयंति
विराजांवाप्रतिपत्कुर्वन्त्यस्त्रिवेत्येतदेकमथापरंनप्रातरनुवाकेन्यूङ्खयंतिनविराजांवाप्रतिपत्कुर्वन्न्यूङ्खयंतित्वास्त्रिवेत्येतदेकमथापरंनप्रातरनुवाकेन्यूङ्खयंतिह
विष्ठस्वभयेषुप्रस्थितेषुमाहेंद्रस्याऽग्रावपेनततऊर्ध्वंन्यूङ्खनंतीत्यरणीहस्तएवैतदहरध्वर्युर्माहेंद्रस्यस्तोत्रमुपाकरोतितदुज्ञातुर्दक्षिणतोरोमंथति १३८
तंजातंसर्वएवाभिहिंकुर्वंति॥३॥तस्यमीमांसागार्हपत्येनुप्रहरेत्प्रतिष्ठाकामानामाग्नीध्रीयेप्रजाकामानांशामित्रेपशुकामानामाहवनीयेस्वर्गका

मानामित्यनादृत्यतत्तमाहवनीयएवानुप्रहरतिभवतंनःसमनसावित्यनुप्रहृत्याऽभिजुहोत्यग्नावग्निश्चरतिप्रविष्टइत्येतावदेवैतदहःशिल्पंक्रियतेऽ
हीनसंततिंकरोत्यथश्वोभूतेतायंतेत्रिणवउक्थ्यःशाक्वरसामेंद्रोतिग्राह्योगृह्यतएवैतदहरनकामिश्राभिरध्वर्युर्माहेंद्रस्यस्तोत्रमुपाकरोतितासांमीमां
सात्वोचोरुवनयेस्तोत्रेस्थावैनिनयेत्प्रोक्षणीःकुर्वतेपुरोडाशीयानिसंयौयादित्येतदनादृत्यतदुज्ञातुष्वधीनाएवैनाःकुर्यात्तदुज्ञातारोहिताभिररण्येगेया
नीसामानांशुचंशातमयंतोमन्यंतेनाउंचेदध्वर्यवेप्रब्रुयुरपोस्यवहरतेत्येवब्रूयादित्येतावदेवैतदहःशिल्पंक्रियतेऽहीनसंततिंकरोत्यथश्वोभूतेतायंतेत्रय
स्त्रिंशउक्थ्योरैवतसामासौर्योतिग्राह्योगृह्यतएवैतदहर्दूर्वामिश्राभिरध्वर्युर्माहेंद्रस्यस्तोत्रमुपाकरोति॥४॥तासामुक्तामीमांसास्वयमृतुयाजमेवैतदह
र्भवतिनैतदहरन्योन्यस्यर्तुयाजंयजतिसयत्राहाध्वर्यूयजतमितितदध्वर्यूजघनेनहविर्धानेउपविश्यस्वयमृतुयाजंयजतोये३यजामहेऽश्विनाध्वर्यूआ
ध्वर्यवादृतुनासोमंपिबतामर्वाचमद्ययंनवाहनंरथंयुंजाथामिहवांविमोचनं॥इंकहवींषिमधुनाहिकंगतमथासोमंपिबतंवाजिनीवसूऋतुनासोमं
पिबतांवौ३षडितिसयत्राहगृहपतेयजेतितद्गृहपतिर्जघनेनगार्हपत्यमुपविश्यस्वयमृतुयाजंयजतिये३यजामहेऽग्निंगृहपतिंगार्हपत्यात्सुगृहपतयस्त्व
याग्नइमेसुन्वंतोयजमानाःसुगृहपतिस्त्वमेभिःसुन्वद्भिर्यजमानैःस्यादग्निर्गृहपतिर्गार्हपत्यादृतुनासोमंपिबतुजोष्यग्नेसमिधंजोष्याहुतिंजोषि
ब्रह्मजन्यंजोषिसुष्टुतिं॥विश्वेभिर्विश्वाऋतुनावसोमहउशांदेवांउशतःपाययाहविर्ऋतुनासोमंपिबतु३वौ३षडितिसुत्तरतोवत्सान्धारयंतिदक्षि
णतोमातृर्माहेंद्रस्तोत्रेऽअंतरेणसदोहविर्धानेसंविनयंवत्सान्मातृभिःसंसृजंतिबध्नंतिवत्सानुत्सृजंतिमातृर्माहेंद्रस्यस्तोत्रमुपाकरोत्यथापराह्ण

Indira Gandhi National Centre for the Arts